सूरसूतोऽरुणोऽनूरुः काश्यपिर्गरुडाग्रजः २०८
परिवेषस्तु परिधिरुपसूर्यकमण्डले २०९
किरणोस्रमयूखांशुगभस्तिघृणिरश्मयः २१०
भानुः करो मरीचिः स्त्रीपुंसयोर्दीधितिः स्त्रियाम् २११

उष्णरश्मिः, विकर्तनः, अर्कः, मार्तण्डः, मिहिरः, अरुणः, पूषा, द्युमणिः, तरणिः, मित्रः, चित्रभानुः, विरोचनः, विभावसुः, ग्रहपतिः, त्विषांपतिः, अहर्पतिः, भानुः, हंसः, सहस्रांशुः, तपनः, सविता, रविः ३७ सूर्यका. ॥—माठरः, पिङ्गलः, दण्डः, ३ सूर्यकापार्श्ववर्ति देवताका.=परितः पार्श्वे विद्यमानाः । ('शक्रोऽस्य वामपार्श्वे तु दण्डाख्यो दण्डनायकः । वह्निस्तु दक्षिणे पार्श्वे पिङ्गलो वामभागतः। यमोऽपि दक्षिणे पार्श्वे भवेन्माठरसंज्ञया') ॥—सूरसूतः, अरुणः, अनूरुः, काश्यपिः, गरुडाग्रजः ५ सूर्यकासारथिका. ॥—परिवेषः, परिधिः, उपसूर्यकम्, मण्डलम्, ४ सूर्य तथा चन्द्रमाका चारैतर्फ देखिने मण्डलका. ॥ किरणः, उस्रः, मयूखः, अंशुः, गभस्तिः, घृणिः, रश्मिः, भानुः, करः, मरीचिः, दीधितिः,

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्युः प्रभारुग्रुचिस्त्विड्भाभाश्छविद्युतिदीप्तयः २१२
रोचिः शोचिरुभे क्लीबे प्रकाशो द्योत आतपः २१३
कोष्णं कवोष्णं मन्दोष्णं कदुष्णं त्रिषु तद्वति २१४
तिग्मं तीक्ष्णं खरं तद्वन्मृगतृष्णा मरीचिका २१५

इति दिग्वर्गः　　७. अथ कालवर्गः

कालो दिष्टोऽप्यनेहापि समयोऽप्यथ पक्षतिः २१६
प्रतिपद्द्वे इमे स्त्रीत्वे तदाद्यास्तिथयो द्वयोः २१७
घस्रो दिनाहनी वा तु क्लीबे दिवसवासरौ २१८
प्रत्यूषोऽहर्मुखं कल्यमुषःप्रत्युषसी अपि २१९
'व्युष्टं विभातं द्वे क्लीबे पुंसि गोसर्ग इष्यते' **
प्रभातं च दिनान्ते तु सायं संध्या पितृप्रसूः २२०
प्राह्णापराह्णमध्याह्नास्त्रिसंध्यमथ शर्वरी २२१
निशा निशीथिनी रात्रिस्त्रियामा क्षणदा क्षपा २२२

---

२१ किरणका. ॥—प्रभा, रुक्, रुचिः, त्विट्, भा, भाः, छविः, द्युतिः, दीप्तिः, रोचिः, शोचिः, ११ प्रभा तेजमात्रका ॥—प्रकाशः, द्योतः, आतपः, ३ सूर्यप्रभाका (घामका) ॥—कोष्णम्, कवोष्णम्, मन्दोष्णम्, कदुष्णम्, ४ मन्तातताका. ॥—तिग्मम्, तीक्ष्णम्, खरम् ३ अत्यन्तताता ॥—मृगतृष्णा, मरीचिका, २ मृगतृष्णाका. ॥—मरुदेशादौ सिकतासु प्रतिच्छुरिताः सूर्यकिरणा जलाकारेण भान्ति तस्य; जलाभासस्य ॥ बालुमा जलाभास हुनु ॥

२१६-२७७. कालः, दिष्टः, अनेहा, समयः ४ कालका. ॥—पक्षतिः, प्रतिपत् २ प्रतिपदाका. ॥—घस्रः, दिनम्, अहः, दिवसः, वासरः ५ दिनका. ॥ प्रत्यूषः, अहर्मुखम्, कल्यम्, उषः, प्रत्युषः, प्रभातम् ६ प्रातकालका. ॥—दिनान्तः, सायं, संध्या, पितृप्रसूः ४ सायंकालका. । प्राह्णः, अपराह्णः, मध्याह्नः, ३ दिनका १ भाग ३ भाग २ भागका ॥ त्रिसंध्यं समयसमूहका ॥ ३ भागका ॥ शर्वरी, निशा, निशीथिनी, रात्रिः, त्रियामा, क्षणदा, क्षपा, विभावरी, तमस्विनी,

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विभावरीतमस्विन्यौ रजनी यामिनी तमी २२३
तमिस्रा तामसी रात्रिर्ज्यौत्स्नी चन्द्रिकयान्विता २२४
आगामिवर्तमानाहर्युक्तायां निशि पक्षिणी २२५
गणरात्रं निशा बह्व्यः प्रदोषो रजनीमुखम् २२६
अर्धरात्रनिशीथौ द्वौ द्वौ यामप्रहरौ समौ २२७
स पर्वसंधिः प्रतिपत्पञ्चदश्योर्यदन्तरम् २२८
पक्षान्तौ पञ्चदश्यौ द्वे पौर्णमासी तु पूर्णिमा २२९
कलाहीने सानुमतिः पूर्णे राका निशाकरे २३०
अमावास्या त्वमावस्या दर्शः सूर्येन्दुसंगमः २३१
सा दृष्टेन्दुः सिनीवाली सा नष्टेन्दुकला कुहूः २३२
उपरागो ग्रहो राहुग्रस्ते त्विन्दौ च पूष्णि च २३३
सोपप्लवोपरक्तौ द्वावग्न्युत्पात उपाहितः २३४

रजनी, यामिनी, तमी १२ रात्रिका नाम ॥ तमिस्रा १ अँधेरिया रातको॥ ज्यौत्स्नी उजेलिया रातको ॥ पक्षिणी १ आगामी व्यतीतदिन युक्त रात्रिका ॥ गणरात्रं १ रात्रिसमूहको ॥–प्रदोषः, रजनीमुखम् २ सन्ध्याका ॥–अर्धरात्रः, निशीथः २ मध्यरातका ॥—यामः, प्रहरः २ प्रहरका ॥ पर्व १ प्रतिपदा पूर्णिमाका संधिका ॥ पक्षान्तौ पञ्चदश्यौ २ अमावास्या र पूर्णिमाका ॥—पौर्णमासी, पूर्णिमा, २ पूर्णिमाका. ॥ सैव पूर्णिमा पूर्णे निशाकरे सति १ पूर्ण चन्द्रमा भयेकी पूर्णिमाको राका १ ॥—अमावास्या, अमावस्या, दर्शः, सूर्येन्दुसंगमः ४ कृष्णपक्षकी अमावस्याका. ॥—सा अमावास्या दृष्टेन्दुश्चेत् दृष्ट इन्दुर्यस्यां सा सिनीवाली १ चन्द्रमा देखिने औंसीका. ॥—सैव नष्टेन्दुकला नष्टा इन्दुकला यस्यां सा कुहूः १ चन्द्रमा नदेखिने औंसीका. ॥—उपरागः, ग्रहः २ ॥ सूर्यचन्द्र ग्रहणको नाम ॥–सोपप्लवः, उपरक्तः २ राहुलेग्रासगरेका बेलाका सूर्यचन्द्रका ॥ अग्न्युत्पातः, उपाहितः २ धूमकेतुआदि उत्पातका.॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

एकयोक्त्या पुष्पवन्तौ दिवाकरनिशाकरौ २३५
अष्टादश निमेषास्तु काष्ठा त्रिंशत्तु ताः कला २३६
तास्तु त्रिंशत्क्षणस्ते तु मुहूर्तो द्वादशास्त्रियाम् २३७
ते तु त्रिंशदहोरात्रः पक्षस्ते दश पञ्च च २३८
पक्षौ पूर्वापरौ शुक्लकृष्णौ मासस्तु तावुभौ २३९
द्वौ द्वौ मार्गादिमासौ स्यादृतुस्तैरयनं त्रिभिः २४०
अयने द्वे गतिरुदग्दक्षिणार्कस्य वत्सरः २४१
समरात्रिंदिवे काले विषुवद्विषुवं च तत् २४२
'पुष्ययुक्ता पौर्णमासी पौषी मासे तु यत्र सा **
नाम्ना स पौषो माघाद्याश्चैवमेकादशापरे' **

एकयोक्त्याऽपृथग्वचनेन पुष्पवन्तौ १ एक बार उच्चारण गरियेका चन्द्रसूर्य दुवैको ।।—निमेषोऽक्षिस्पन्दकालः १ निमेषको ।। अष्टादश निमेषामिलित्वैका काष्ठा १ काष्ठाको नाम ।। त्रिंशत्काष्ठा मिलित्वैका कला १ कलाको नाम ।। ताः कलास्त्रिंशन्मिलित्वैकः क्षणः १ क्षणको नाम ।। ते क्षणः द्वादश मिलित्वैको मुहुर्तः मुहूर्तको ।। पुं.,नपुं.माछ । ते त्रिंशन्मुहूर्ता एकः १ अहोरात्रको नाम ।। तेऽहोरात्राः पञ्चदशसंख्याका एकः पक्षः १ पक्षको नाम ।। पक्षो द्विविधः शुक्लः १ शुक्लःपक्षको नाम ।। कृष्णः १ कृष्णपक्षको नाम ।। मास १ महिनाको नाम ।। मार्गादि द्वौ द्वौ मासौ ऋतुः १ ऋतुको नाम ।। स च हेमन्तादिसंज्ञः । तै ऋतुभिस्त्रिभिरेकम् अयनम् १ अयनको ।। सूर्यगतिभेदात् तद्द्विविधा—अर्कस्योदग्गतिः, उत्तरायणम् १ उत्तरायणको नाम ।। दक्षिणगतिस्तु दक्षिणायनम् १ दक्षिणायनको । एवं द्वे अयने एको वत्सरः १ वर्षको ।।—विषुवत्, विषुवम्, समं रात्रिंदिवं यस्मिंस्तस्मिन्काले । तुलासंक्रान्तौ मेषसंक्रान्तौ च दिनरात्री समे भवतस्तस्य कालस्य २ तुलासंक्रान्तिः २ मेषसंक्रान्तिका. ।।—मार्गशीर्षः,

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मार्गशीर्षे सहा मार्ग आग्रहायणिकश्च सः २४३
पौषे तैषसहस्यौ द्वौ तपा माघेऽथ फाल्गुने २४४
स्यात्तपस्यः फाल्गुनिकः स्याच्चैत्रे चैत्रिको मधु २४५
वैशाखे माधवो राधो ज्येष्ठे शुक्रः शुचिस्त्वयम् २४६
आषाढे श्रावणे तु स्यान्नभाः श्रावणिकश्च सः २४७
स्युर्नभस्यप्रौष्ठपदभाद्रभाद्रपदाः समाः २४८
स्यादाश्विन इषोऽप्याश्वयुजोऽपि स्यात्तु कार्तिके २४९
बाहुलोर्जौ कार्तिकिको हेमन्तः शिशिरोऽस्त्रियाम् २५०
वसन्ते पुष्पसमयः सुरभिर्ग्रीष्म उष्मकः २५१
निदाघ उष्णोपगम उष्ण ऊष्मागमस्तपः २५२
स्त्रियां प्रावृट् स्त्रियां भूम्नि वर्षा अथ शरत्स्त्रियाम् २५३

सहाः । मार्गः, आग्रहायणिकः ४ मुङ्सीरमहिनाका ॥—पौषः, तैषः, सहस्यः ३ पौष महिनाका. ॥—तपाः, माघः २ माघ महिनाका. ॥—फाल्गुनः, तपस्यः, फाल्गुनिकः ३ फाल्गुन महिनाका. ॥—चैत्रः, चैत्रिकः, मधुः ३ चैत्र महिनाका. ॥—वैशाखः, माधवः, राधः ३ वैशाख महिनाका. ॥ ज्येष्ठः, शुक्रः २ ज्येष्ठ महिनाका. ॥—शुचिः, आषाढः २ आषाढ महिनाका. ॥—श्रावणः, नभाः, श्रावणिकः ३ श्रावण महिनाका. ॥—नभस्यः, प्रौष्ठपदः, भाद्रः, भाद्रपदः ४ भाद्र महिनाका. ॥—आश्विनः, इषः, आश्वयुजः, ३ आश्विन महिनाका ॥ कार्तिकः, बाहुलः, ऊर्जः, कार्तिकिकः, ४ कार्तिक महिनाका ॥ —हेमन्त १ हेमन्त ऋतुको ॥—शिशिरः १ शिशिर ऋतुको ॥ यो पुं-नपुंसकलिङ्गमाछ ॥-वसन्तः, पुष्पसमयः, सुरभिः ३ वसन्त ऋतुका. ॥ ग्रीष्मः, उष्मकः, निदाघः, उष्णोपगमः, उष्णः, ऊष्मागमः, तपः, ७ ग्रीष्म ऋतुका. । 'तप' अकारान्तः पुंलिङ्गमाछ।।-प्रावृट्, वर्षाः, २ वर्षा ऋतुका ॥ तत्र 'प्रावृट्'

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

षडमी ऋतवः पुंसि मार्गादीनां युगैः क्रमात् २५४
संवत्सरो वत्सरोऽब्दो हायनोऽस्त्री शरत्समाः २५५
मासेन स्यादहोरात्रः पैत्रो वर्षेण दैवतः २५६
दैवे युगसहस्रे द्वे ब्राह्मः कल्पौ तु तौ नृणाम् २५७
मन्वन्तरं तु दिव्यानां युगानामेकसप्ततिः २५८
संवर्तः प्रलयः कल्पः क्षयः कल्पान्त इत्यपि २५९
अस्त्री पङ्कं पुमान्पाप्मा पापं किल्बिषकल्मषम् २६०
कलुषं वृजिनैनोऽघमंहो दुरितदुष्कृतम् २६१
स्याद्धर्ममस्त्रियां पुण्यश्रेयसी सुकृतं वृषः २६२

शब्दः षान्तः त्रिलिङ्गमाछ । 'वर्षा'शब्दस्तु स्त्रीलिङ्गो भूम्नि नित्यं बहुवचनान्तः
छ । शरत् १ शरद्ऋतुको ॥—इ हेमन्तादि ६ ऋतुको मुङ्सरि पौष हेमन्तः
ऋतु यस्तैप्रकारले २ मैनाको १ ऋतु हुन्छन् स्वयं जान्नु ॥ संवत्सरः,
वत्सरः, अब्दः, हायनः, शरत्, समाः, इ ६ वर्षका नाम ॥ 'समाः'
स्त्रियां बहुत्वे च ॥—पैत्रोऽहोरात्रः मनुष्यका १ महिनाको पितृको १ अहो-
रात्र हुन्छ ॥—तथा मानुषेण वर्षेण दैवतो देवतानामहोरात्रः मनुष्यका
१ वर्षको देवताको १ अहोरात्र हुन्छ ॥—मानुषाणां यत्कृतानि युगचतुष्टयं
तद्दैवं युगं ज्ञेयम् । मनुष्यका सत्य त्रेता द्वापर कलि ४ युगको देवताको १ युग
हुन्छ ॥ एवं दैवे द्वे युगसहस्रे ब्रह्मणोऽहोरात्रः देवताको २००० युगको ब्रह्मा-
जीको १ अहोरात्र हुन्छ ॥ ये द्वे दैवे युगसहस्रे तौ ॥ देवताका २ हजार युगको
मनुष्यका २ कल्प हुन्छन् ॥ दिव्यानां युगानां या एकसप्ततिरेकाधिका सप्ततिस्तत्
मन्वन्तरम् देवताका ७१ युगको मनुष्यको १ मन्वन्तर हुन्छ ॥—संवर्तः,
प्रलयः । कल्पः, क्षयः, कल्पान्तः, इ ५ प्रलयका नाम ॥-पङ्कम्, पाप्मा, पापम्,
किल्बिषम्, कल्मषम्, कलुषम्, वृजिनम्, एनः, अघम्, अंहः, दुरितम्,
१२ पापका । यस्मा 'पङ्कम्' स्त्रीलिङ्ग र पुंलिङ्गमाछ । 'पाप्मा' नकारान्तः
पुंलिङ्ग । बाकि नपुंसकमा ॥—धर्मम्, पुण्यम्, श्रेयः, सुकृतम्, वृषः, ५ धर्मका ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मुत्प्रीतिः प्रमदो हर्षः प्रमोदामोदसंमदाः २६३
स्यादानन्दथुरानन्दः शर्मसातसुखानि च २६४
श्वःश्रेयसं शिवं भद्रं कल्याणं मङ्गलं शुभम् २६५
भावुकं भविकं भव्यं कुशलं क्षेममस्त्रियाम् २६६
शस्तं चाथ त्रिषु द्रव्ये पापं पुण्यं सुखादि च २६७
मतल्लिका मचर्चिका प्रकाण्डमुद्धतल्लजौ २६८
प्रशस्तवाचकान्यमून्ययः शुभावहो विधिः २६९
दैवं दिष्टं भागधेयं भाग्यं स्त्री नियतिर्विधिः १७०
हेतुर्ना कारणं बीजं निदानं त्वादिकारणम् २७१
क्षेत्रज्ञ आत्मा पुरुषः प्रधानं प्रकृतिः स्त्रियाम् २७२

तत्र 'धर्मः' अस्त्रियां क्लीब-पुंसोः। वृषः पुंसि ॥—मुत्, प्रीतिः, प्रमदः, हर्षः, प्रमोदः, आमोदः, संमदः, आनन्दथुः, आनन्दः, शर्मः, सातम्, सुखम्, १२ हर्षका। तत्र प्रीतिसाहचर्यान्मुदपि स्त्रियां दकारान्तः ॥—श्वःश्रेयसम्, शिवम्, भद्रम्, कल्याणम्, मङ्गलम्, शुभम्, भावुकम्, भविकम्, भव्यम्, कुशलम्, क्षेमम्, शस्तम्, १२ कल्याणका। तत्र 'क्षेमम्' 'शस्तम्' च पुं-नपुंसकयोः। पापपुण्यशब्दा तथा सुखादिशब्दाः श्वः, श्रेयः, शिवभद्रादयः, शस्तान्ता द्रव्ये विशेष्ये वर्तमानास्त्रिषु। यथा—'पापा स्त्री', 'पापः पुमान्' 'पापं कुलम्' इत्यादि जान्नु। मतल्लिका, मचर्चिका, प्रकाण्डम्, उद्धः, तल्लजः ५ असलका। एते तु पञ्च नित्यं द्रव्य एव लिङ्गान्तरेण सामानाधिकरण्येऽपि स्वलिङ्गं न जहाति। यथा—प्रशस्तो ब्राह्मणः-ब्राह्मणमतल्लिका, प्रशस्ता गौः-गोमचर्चिका, गोप्रकाण्डम्, ब्राह्मणोद्धः, कुमारीतल्लजः, इत्यादि जान्नु ॥—अयः शुभावहो विधिः १। शुभोत्पादक दैवको ॥—दैवम्, दिष्टम्, भागधेयम्, भाग्यम्, नियतिः, विधिः, ६ भाग्यका। 'नियतिः' स्त्री.। 'विधिः' पुं० ॥—हेतुः, कारणम्, बीजम्, ३ कारणका। 'हेतुः' ना पुंलिङ्ग छ ॥—आदिकारणम्, निदानम्, २ मुख्य कारणका ॥—क्षेत्रज्ञः, आत्मा, पुरुषः, ३ आत्माका ॥—प्रधानम्, प्रकृतिः,

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विशेषः कालिकोऽवस्था गुणाः सत्त्वं रजस्तमः २७३
जनुर्जननजन्मानि जनिरुत्पत्तिरुद्भवः २७४
प्राणी तु चेतनो जन्मी जन्तुजन्युशरीरिणः २७५
जातिर्जातं च सामान्यं व्यक्तिस्तु पृथगात्मता २७६
चित्तं तु चेतो हृदयं स्वान्तं हृन्मानसं मनः २७७

इति कालवर्गः ॥ ८. अथ धीवर्गः—

बुद्धिर्मनीषा धिषणा धीः प्रज्ञा शेमुषी मतिः २७८
प्रेक्षोपलब्धिश्चित्संवित्प्रतिपज्ज्ञप्तिचेतनाः २७९
धीर्धारणावती मेधा संकल्पः कर्म मानसम् २८०
'अवधानं समाधानं प्रणिधानं तथैव च' ❀❀
चित्ताभोगो मनस्कारश्चर्चा संख्या विचारणा २८१

---

२ सत्त्वादिगुणसाम्यावस्थाकी प्रकृति (माया) का ॥—यः कालिको विशेषः कालकृतो देहादेर्विशेषो यौवनादिः सा अवस्था २ (उमेर) का नाम ॥ सत्त्वम्, रजः, तमः ३ प्रकृतिका धर्म सत्वरजःतमका ॥ तत्र रजस्तमसी सान्ते ॥ जनुः, जननम्, जन्म, जनिः, उत्पत्तिः, उद्भवः, ६ जन्मका ॥—प्राणी, चेतनः, जन्मी, जन्तुः, जन्युः, शरीरी ६ प्राणिका ॥—जातिः, जातम्, सामान्यम्, ३ घटत्वादि ब्राह्मणत्वादि जातिका. ॥—व्यक्तिः, पृथगात्मता, २ घटादिजातिमान् व्यक्तिका. ॥—चित्तम्, चेतः, हृदयम्, स्वान्तम्, हृत्, मानसम्, मनः, ७ चित्तका ॥—

२७८–३११. बुद्धिः, मनीषा, धिषणाः, धीः, प्रज्ञा, शेमुषी, मतिः, प्रेक्षा, उपलब्धिः, चित्, संवित्, प्रतिपत्, ज्ञप्तिः, चेतना, १४ बुद्धिका ॥—या धारणावती धीः सा मेधा १ स्फुर्तिली (फूर्ति) भयेकी बुद्धिका. ॥—यन्मानसं कर्म मनोव्यापारः स संकल्पः १ संकल्पका ॥—चित्ताभोगः, मनस्कारः, २ सुखादिको

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

'विमर्शो भावना चैव वासना च निगद्यते' ॥॥
अध्याहारस्तर्क ऊहो विचिकित्सा तु संशयः २८२
संदेहद्वापरौ चाथ समौ निर्णयनिश्चयौ २८३
मिथ्यादृष्टिर्नास्तिकता व्यापादो द्रोहचिन्तनम् २८४
समौ सिद्धान्तराद्धान्तौ भ्रान्तिर्मिथ्यामतिर्भ्रमः २८५
संविदागूः प्रतिज्ञानं नियमाश्रवसंश्रवाः २८६
अङ्गीकाराभ्युपगमप्रतिश्रवसमाधयः २८७
मोक्षे धीर्ज्ञानमन्यत्र विज्ञानं शिल्पशास्त्रयोः २८८
मुक्तिः कैवल्यनिर्वाणश्रेयोनिःश्रेयसामृतम् २८९
मोक्षोऽपवर्गोऽथाज्ञानमविद्याहं मतिः स्त्रियाम् २९०
रूपं शब्दो गन्धरसस्पर्शाश्च विषया अमी २९१

मन्सुबाका ॥—चर्चा, संख्या, विचारणा, ३ प्रमाणले अर्थ विचारगर्नाका ॥ अध्याहारः, तर्कः, ऊहः ३ तर्कका. ॥—विचिकित्सा, संशयः, संदेहः, द्वापरः, ४ संशयज्ञानका. ॥—निर्णयः, निश्चयः, २ निश्चयज्ञानका. ॥—मिथ्यादृष्टिः, नास्तिकता, २ परलोकछैन भन्ने नास्तिकपनाका. ॥—व्यापादः, द्रोहचिन्तनम्, २ अर्काका उपरद्रोहचिताउनका. ॥—सिद्धान्तः, राद्धान्तः, २ सिद्धान्तका. ॥—भ्रान्तिः, मिथ्यामतिः, भ्रमः, ३ अयथार्थज्ञान, (भ्रान्ति)का. ॥—संवित्, आगूः, प्रतिज्ञानम्, नियमः, आश्रवः, संश्रवः, अङ्गीकारः, अभ्युपगमः, प्रतिश्रवः, समाधिः, १० प्रतीज्ञाका. ॥—आगूर्वधूवत् ॥—मोक्षविषये या धीर्बुद्धिस्तज्ज्ञानम् १ मुक्तिविषयक ब्रह्मज्ञानको. ॥—मोक्षशास्त्रादन्यत्र शास्त्रे शिल्पे चित्रादौ च धीर्विज्ञानं १ ॥ शिल्पशास्त्रविषयरु-ज्ञानको. ॥—मुक्तिः, कैवल्यम्, निर्वाणम्, श्रेयः, निःश्रेयसम्, अमृतम्, मोक्षः, अपवर्गः, ८ मोक्षका. ॥—अज्ञानम्, अविद्या, अहंमतिः, ३ अज्ञानका सांसारिक कारणका. ॥—रूपम्, शब्दः, गन्धः, रसः, स्पर्शः, ५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

गोचरा इन्द्रियार्थाश्च हृषीकं विषयीन्द्रियम् २९२
कर्मेन्द्रियं तु पाय्वादि मनोनेत्रादि धीन्द्रियम् २९३
तुवरस्तु कषायोऽस्त्री मधुरो लवणः कटुः २९४
तिक्तोऽम्लश्च रसाः पुंसि तद्वत्सु षडमी त्रिषु २९५
विमर्दोत्थे परिमलो गन्धे जनमनोहरे २९६
आमोदः सोऽतिनिर्हारी वाच्यलिङ्गत्वमागुणात् २९७
समाकर्षी तु निर्हारी सुरभिर्घ्राणतर्पणः २९८
इष्टगन्धः सुगन्धिः स्यादामोदी मुखवासनः २९९
पूतिगन्धिस्तु दुर्गन्धो विस्रं स्यादामगन्धि यत् ३००

चक्षुरादि ५ ज्ञानेन्द्रियका ५ विषयका ।। गोचरा, इन्द्रियार्था, २ इ पनि विषयनै हुन् ।।–हृषीकम्, विषयि, इन्द्रियम्, ३ चक्षु आदि इन्द्रियका. ।।—पाय्वादि ५ पायूपस्थादि कर्मेन्द्रियका ।। आदिना वागादि । ('पायूपस्थं पाणि-पादौ वाक् चेतीन्द्रियसंग्रहः । उत्सर्गआनन्दादानगत्यालापाश्च तत्क्रिया, इनका क्रियाका. ।।—मनोनेत्रादि ज्ञानेन्द्रिय ५ का. ।।—आदिना श्रोत्रादि लिनु । ('मनो कर्णस्तथा नेत्रं रसना च त्वचा सह । नासिका चेति षट् तानि धीन्द्रियाणि प्रचक्षते') ज्ञानेन्द्रियका. ।।—तुवरः, कषायः, २ टर्राका ।। मधुरः, लवणः, कटुः, तिक्तः, अम्लः, ५ गुलिया नूनिला पीरा तीता अमिला ५ का ५ नाम जान्नु ।। अमी तुवराद्याः षडपि रसमात्रे वर्तमानाः, पुंसि । तद्वत्सु रसवत्सु वर्तमानास्त्रिषु, वाच्यलिङ्गा ।।—विमर्दोत्थे संघर्षणादिनोत्पन्ने जनमनोहरे गन्धे परिमल १ माडदा आउने सुगन्धको. ।। आमोद १ मन हरण गर्ने सुगन्धको ।।—इतः परम् आगुणात् 'गुणे शुक्लादयः' (३११) वक्ष्य, माणाद्गुणशब्दात्प्राग्वाच्यलिङ्गत्वमभिधेयानुसारेण त्रिलिङ्गत्वम् त्रिलिङ्ग जान्नु ।।—समाकर्षी, निर्हारी, २ टाढासम्मपुग्ने सुगन्धका. ।।—सुरभिः, घ्राणतर्पणः, इष्टगन्धः, सुगन्धिः, ४ शोभन साधारण गन्धका. ।।—आमोदी,

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शुक्लशुभ्रशुचिश्वेतविशदश्येतपाण्डराः ३०१
अवदातः सितो गौरो वलक्षो धवलोऽर्जुनः ३०२
हरिणः पाण्डुरः पाण्डुरीषत्पाण्डुस्तु धूसरः ३०३
कृष्णे नीलासितश्यामकालश्यामलमेचकाः ३०४
पीतो गौरो हरिद्राभः पालाशो हरितो हरित् ३०५
लोहितो रोहितो रक्तः शोणः कोकनदच्छविः ३०६
अव्यक्तरागस्त्वरुणः श्वेतरक्तस्तु पाटलः ३०७
श्यावः स्यात्कपिशो धूम्रधूमलौ कृष्णलोहिते ३०८
कडारः कपिलः पिङ्गपिशङ्गौ कद्रुपिङ्गलौ ३०९
चित्रं किर्मीरकल्माषशबलैताश्च कर्बुरे ३१०

मुखवासनः, २ मुखलाई सुगन्धितगराउने ताम्बुलादि द्रव्यका ॥—पूतिगन्धिः, दुर्गन्धः, २ दुर्गन्धका ॥—यदामगन्धि तद्विस्रम् । १ काँचो सड़ेको दुर्गन्धिको ॥—शुक्लः, शुभ्रः, शुचिः श्वेतः, विशदः, श्येतः, पाण्डरः, अवदातः, सितः, गौरः, [अवलक्षः] वलक्षः, धवलः, अर्जुनः, हरिणः, पाण्डुरः, पाण्डुः, १६ सेतावर्णका. ॥—ईषत्पाण्डुः, धूसरः, २ फिका सेतापहेलाका ॥—कृष्णः, नीलः, असितः, श्यामः, कालः, श्यामलः, मेचकः, ७ काला वर्णका. ॥—पीतः, गौरः, हरिद्राभः, ३ पहेलोवर्णका. ॥—पालाशः, हरितः, हरित्, ३ हरियाका. ॥—लोहितः, रोहितः, रक्तः. ३ रातावर्णका. ॥—यः कोकनदच्छवी रक्तोत्पलाभः स शोणः १ फिकारातको ॥—योऽव्यक्तराग ईषद्रक्तः अरुणः १ अलि अलि राताको ॥ यः श्वेतमिश्रो रक्तः स पाटल १ सेतो मिलेको राताको ॥—श्यावः, कपिशः, २ कालोपहेलाका. ॥—धूम्रः, धूमलः, कृष्णलोहितः, ३ रातोरकालो मिलेका वर्णका. ॥—कडारः, कपिलः, पिङ्गः, पिशङ्गः, कद्रुः, पिङ्गलः, ६ कैला वर्णका. ॥—चित्रम्, किर्मीरः, कल्माषः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

गुणे शुक्लादयः पुंसि गुणिलिङ्गास्तु तद्वति ३११

इति धीवर्गः ॥　　९. अथ शब्दादिवर्गः

ब्राह्मी तु भारती भाषा गीर्वाग्वाणी सरस्वती ३१२
व्याहार उक्तिर्लपितं भाषितं वचनं वचः ३१३
अपभ्रंशोऽपशब्दः स्याच्छास्त्रे शब्दस्तु वाचकः ३१४
तिङ्सुबन्तचयो वाक्यं क्रिया वा कारकान्विता ३१५
श्रुतिः स्त्री वेद आम्नायस्त्रयी धर्मस्तु तद्विधिः ३१६
स्त्रियामृक्सामयजुषी इति वेदास्त्रयस्त्रयी ३१७

शबलः, एतः, कर्बुरः ६ छिर्बिरेका चित्रविचित्रनानाप्रकारका ॥—शुक्लादयो गुणे गुणमात्रे वर्तमानाः पुंसि, यथा—'अस्य पटस्य शुक्लं रूपम्'। तद्वति गुणवति वस्तुनि वर्तमाना गुणिलिङ्गा अभिधेयलिङ्गाः। यथा—'शुक्ला शाटी:' 'शुक्लः पटः, 'शुक्लं वस्त्रम्'। रोहितादीनां स्त्रीत्वे तु—'श्येनी श्येता, रोहिणी रोहिता, लोहिनी लोहिता' इत्यादि जान्नु ॥

३१२–३६२. ब्राह्मी, भारती, भाषा, गीः, वाक्, वाणी, सरस्वती; व्यवहारः, उक्तिः, लपितम्, भाषितम्, वचनम्, वचः, १२ सरस्वतीका र वचनका ॥—अपभ्रष्टः, शब्दः 'गावी, गोणी' इत्याद्यपशब्दः, अपभ्रंश २ अशुद्धशब्दका ॥—शास्त्रे व्याकरणादौ यो वाचकः स शब्द १ शुद्धशब्दको यथा—ओतप्रोततन्तूनां वाचकः पटः इत्यादि जान्नु। तिङसुबन्तचयः तिङन्त-सुबन्तपदसमूहः १ वाक्यको। तिङन्तचयो यथा—'पचति भवति'। सुबन्तचयो यथा—'प्रकृतिसिद्धमिदं हि महात्मनाम्' इत्यादि जान्नु—कारकान्विता कारकैः संबद्धा क्रिया वाक्यं १ कारकयुक्तवाक्यको ॥ यथा—'देवदत्त! गामभिरक्ष शुक्लदण्डेन' इत्यादि जान्नु ॥ श्रुतिः, वेदः, आम्नायः, त्रयी, ४ वेदका ॥ तद्विधिर्वैदिको विधिर्यागादिर्धर्म १ वेदविहितकर्मको ॥ ऋक् १ ऋक्वेदको ॥ साम १ सामवेदको ॥ यजुः १ यजुर्वेदको ॥ वेदा मिलितास्त्रयी १ तिनैवेदलाई भन्दाको

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शिक्षेत्यादि श्रुतेरङ्गमोंकारप्रणवौ समौ ३१८
इतिहासः पुरावृत्तमुदात्ताद्यास्त्रयः स्वराः ३१९
आन्वीक्षिकी दण्डनीतिस्तर्कविद्यार्थशास्त्रयोः ३२०
आख्यायिकोपलब्धार्था पुराणं पञ्चलक्षणम् ३२१
प्रबन्धकल्पना कथा प्रवह्लिका प्रहेलिका ३२२
स्मृतिस्तु धर्मसंहिता समाहृतिस्तु संग्रहः ३२३
समस्या तु समासार्था किंवदन्ती जनश्रुतिः ३२४

नाम ॥ 'ऋक्'शब्दः, स्त्रीलिङ्गः जान्नु ॥—शिक्षेत्यादि श्रुतेर्वेदस्याङ्गं १ शिक्षा, कल्प, व्याकरण, निरुक्त, ज्योतिष, छन्दः ६ वेदका अङ्गको नाम ॥ शिक्षा कल्पो व्याकरणं निरुक्तं ज्योतिषां गतिः । छन्दोविचितिरित्येष षडङ्गो वेद उच्यते ॥ इत्यादि जान्नु ॥—ओंकारः, प्रणवः २ ॐ कारका ॥ इतिहासः, पुरावृत्तम् २ इतिहास महाभारतादिका ॥—उदात्ताद्यास्त्रयः स्वराः ३ स्वरका । ('उदात्तश्चानुदात्तश्च स्वरितश्च स्वरास्त्रयः इत्यादि जान्नु) ॥—आन्वीक्षिकी १ गौतमादिप्रणित तर्कविद्याको ॥ दण्डनीतिः १ बृहस्पतिप्रणित अर्थशास्त्रको ॥ —आख्यायिका, उपलब्धार्था, अनुभूतार्थप्रतिपादकस्य २ अनुभूतार्थप्रतिपादक वासवदत्तादि सच्चा कथाका ॥—यत् पञ्चलक्षणं तत् पुराणम् २ पुराणका ॥ ('सर्गश्च प्रतिसर्गश्च वंशो मन्वन्तराणि च । वंश्यानुचरितं चैव पुराणं पञ्चलक्षणम्') ५ लक्षण पुराणका हुन्छन् ॥—प्रबन्धस्य वाक्यविस्तरस्य या कल्पना रचना सा कथा नाटकरामायणादेः प्रबन्धकल्पना कथा २ कल्पितकथाको ॥—प्रवह्लिका, प्रहेलिका २ प्रहेलिका अर्काले संन्देह गर्ने गरि बोलेका वाक्यको ॥ जस्तै 'पानीयं पातुमिच्छामि त्वत्तः कमललोचने । यदि दास्यसि नेच्छामि नो दास्यसि पिबाम्यहम् ॥' [दास्यसि=दातुमिच्छसि इति व्यक्तोऽर्थः, दास्यसि=दासी+असि इति गूढोऽर्थः] इति ॥—या मन्वादिभिः प्रणीता धर्मसंहिता धर्मबोधार्थं रचिता संहिता सा स्मृतिः २ धर्मशास्त्रको ॥ समाहृतिः, संग्रहः २ संग्रहग्रन्थको नाम ॥—या समासार्था पूरणीयार्था सा समस्या १ ॥ समस्या पूर्तिको नाम ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वार्ता प्रवृत्तिर्वृत्तान्त उदन्तः स्यादथाह्वयः ३२५
आख्याह्वे अभिधानं च नामधेयं च नाम च ३२६
हूतिराकारणाह्वानं संहूतिर्बहुभिः कृता ३२७
विवादो व्यवहारः स्यादुपन्यासस्तु वाङ्मुखम् ३२८
उपोद्घात उदाहारः शपनं शपथः पुमान् ३२९
प्रश्नोऽनुयोगः पृच्छा च प्रतिवाक्योत्तरे समे ३३०
मिथ्याभियोगोऽभ्याख्यानमथ मिथ्याभिशंसनम् ३३१
अभिशापः प्रणादस्तु शब्दः स्यादनुरागजः ३३२
यशः कीर्तिः समज्ञा च स्तवः स्तोत्रं स्तुतिर्नुतिः ३३३

यथा—'शतचन्द्रं नभस्थलम्'। तत्पूरणं यथा—'दामोदरकराघातविह्वलीकृतचेतसा। दृष्टं चाणूरमल्लेन' इत्यादि जान्नु ॥ किंवदन्ती, जनश्रुतिः २ दुनियाँमा चलेका कुराका नाम ॥—वार्ता, प्रवृत्तिः, वृत्तान्तः, उदन्तः ४ यथास्थित लोकमाचलेका हालखबरका नाम ॥—आह्वयः, आख्या, आह्वा, अभिधानम्, नामधेयम्, नाम ६ नामका ॥—हूतिः, आकारणा, आह्वानम् ३ बोलाउनाका (हपार्नु) का ॥—या बहुभिः कृता हूतिः, सा सं' तिः १ धेरै जनाले १ चोटी बोलाउनाको (हपार्नु) को ॥ विवादः, व्यवहारः २ ऋण लिंदादिंदा झगड़ामुद्दासंबन्धि वादविवादगर्नुका ॥ उपन्यासः, वाङ्मुखम्, २ वचनका आरम्भका ॥ उपोद्घातः, उदाहारः २ प्रकृतसंबन्धि विचारका ॥—शपनम्, शपथः २ शपथ (किरिया) का ॥—प्रश्नः, अनुयोगः, पृच्छा ३ प्रश्नका ॥ प्रतिवाक्यम्, उत्तरम् २ उत्तरका ॥ मिथ्याभियोगः, अभ्याख्यानम् २ झूटोबात लगाउनाका ॥ 'शतं मे धारयसि' सहेरुपिया मेरो लियेको छस् इत्यादि जान्नु ॥—मिथ्याभिशंसनम्, अभिशापः २ सुरापानादिमिथ्यापापको झूटो अत्तो लगाउनुका ॥—अनुरागजो गुणानुरागोत्थः शब्दः प्रणाद १ प्रेमले बोलेका शब्दको ॥—यशः, कीर्तिः, समज्ञा ३ कीर्तिका ॥—स्तवः, स्तोत्रं,

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

आम्रेडितं द्विस्त्रिरुक्तमुच्चैर्घुष्टं तु घोषणा ३३४
काकुः स्त्रियां विकारो यः शोकभीत्यादिभिर्ध्वनेः ३३५
अवर्णाक्षेपनिर्वादपरीवादापवादवत् ३३६
उपक्रोशो जुगुप्सा च कुत्सा निन्दा च गर्हणे ३३७
पारुष्यमतिवादः स्याद्भर्त्सनं त्वपकारगीः ३३८
यः सनिन्द उपालम्भस्तत्र स्यात्परिभाषणम् ३३९
तत्र त्वाक्षारणा यः स्यादाक्रोशो मैथुनं प्रति ३४०
स्यादाभाषणमालापः प्रलापोऽनर्थकं वचः ३४१
अनुलापो मुहुर्भाषा विलापः परिदेवनम् ३४२

स्तुतिः, नुतिः ४ स्तुतिका नाम ।।—आम्रेडितम् १–२–३ बार दोहऱ्यायेका शब्दको ।। यथा–सर्पः सर्पः ।।—उच्चैर्घुष्टम्, घोषणा २ उच्चास्वरले चिलयायेका शब्दका ।। शोकभीतिकामादिभिर्ध्वनेर्यो विकारः सा काकुः १ शोक–डर हर्ष प्रभृतिले भयेका स्वरविकारको ।।—अवर्णः, आक्षेपः, निर्वादः, परीवादः, अपवादः, उपक्रोशः, जुगुप्सा, कुत्सा, निन्दा, गर्हणम् १० निन्दाका ।। 'अपवादवत्' इति वत्प्रत्ययेनावर्णादीनामुपक्रोशस्य चैकलिङ्गत्वं ज्ञापितम् । उपक्रोशान्ता अवर्णादयः, पुंसि भन्ने तात्पर्य हो ।।—पारुष्यम्, अतिवादः, २ निष्ठुरभाषणका नाम ।।—अपकारगीः अपकारार्थकं भाषणं, तद् भर्त्सनं २ हप्काउनु (झर्पानु) का ।।—कस्यांचित् व्यक्तौ क्रोधपूर्वकं दोषप्रतिपादनं उपालम्भः, १ क्रोध निन्दासहितको गालीको।। यः सनिन्दो निन्दायुक्त उपालम्भः ५ परिभाषणं २ शिकायतसहित दोषकहनुका ।।—मैथुनं प्रति परस्त्रीपुरुष, संयोगेन निमित्तेन य आक्रोशस्तत्र आक्षारणा १ परपुरुष या परस्त्री गमन संबन्धि दोषलगाउनेको ।।—आभाषणम्, आलापः, २ बातचित गर्नाका ।। यदनर्थकं वचः स प्रलाप अर्थनवर्थका वचनको ।।—अनुलापः, मुहुर्भाषा, २ बार बार बोलने वचनको ।।—विलापः, परिदेवनम्, २ रूँदै अलाप् विलापगर्नुका ।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विप्रलापो विरोधोक्तिः संलापो भाषणं मिथः ३४३
सुप्रलापः सुवचनमपलापस्तु निह्नवः ३४४
'चोद्यमाक्षेपाभियोगौ शापाक्रोशौ दुरेषणा **
अस्त्री चाटु चटु श्लाघा प्रेम्णा मिथ्याविकत्थनम्' **
संदेशवाग्वाचिकं स्याद्वाग्भेदास्तु त्रिषूत्तरे ३४५
रुशती वागकल्याणी स्यात्कल्या तु शुभात्मिका ३४६
अत्यर्थमधुरं सान्त्वं संगतं हृदयंगमम् ३४७
निष्ठुरं परुषं ग्राम्यमश्लीलं सूनृतं प्रिये ३४८
सत्येऽथ संकुलक्लिष्टे परस्परपराहते ३४९
लुप्तवर्णपदं ग्रस्तं निरस्तं त्वरितोदितम् ३५०

विप्रलापः, विरोधोक्तिः, २ परस्परनमिलेका कुराको ॥—मिथः परस्परमुक्ति-प्रत्युक्तियुक्तं यद्भाषणं स संलापः १ परस्पर बोलनाको नाम ॥—सुप्रलापः, सुवचनम्, २ असल वचनका ॥—अपलापः, निह्नवः, २ ढाँटनाका ॥—संदेश-वाक्, वाचिकम्, २ दूतादिद्वारा समाचार पठायेका मौखिक संन्देशका ॥—अतः परं वक्ष्यमाणा वाग्भेदाः सम्यगन्तास्त्रिषु । यो भन्दाअगाडी सम्यक्संमका-शब्द त्रिलिङ्गमाछन् जस्तै ॥—रुशन् शब्दः, रुशद्वचनम् । या अकल्याणी वाक् सा रुशती १ अशुभवचनको नाम ॥ या शुभात्मिका वाक् सा कल्या १ शुभ वचनको ॥—यदत्यर्थमतिशयेन मधुरं तत् सान्त्वम् १ साह्रै मीठावचनको नाम ॥ संगतम्, हृदयंगमम्, २ चित्तबुझने वचनका ॥—निष्ठुरम्, परुषम् २ कठोर रूखाबचनका नाम ॥—ग्राम्यम्, अश्लीलम्, २ पाखे गँवार बोलीका नाम ॥—यत्प्रियं सत्यं वचनं तत् सूनृतं २ साँचो प्यारो बोलीका ॥ यत्परस्परेण विरुद्धं 'माता मे वन्ध्या' इतिवत् पूर्वापरविरुद्धं संकुलम्, क्लिष्टम्, २ परस्पर न मिलने वचनका नाम ॥ जस्तै 'पश्यत्यचक्षुः स शृणोत्यकर्णः' इत्यादिजान्नु ॥ यल्लुप्तवर्णपदमसंपूर्णोच्चारितं वचस्तत् ग्रस्तं १ वर्णपदलुप्तपारेका

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अम्बूकृतं सनिष्ठीवमबद्धं स्यादनर्थकम् ३५१
अनक्षरमवाच्यं स्यादाहतं तु मृषार्थकम् ३५२
'सोल्लुण्ठनं तु सोत्प्रासं भणितं रतिकूजितम् **
श्राव्यं हृद्यं मनोहारि विस्पष्टं प्रकटोदितम्' **
अथ म्लिष्टमविस्पष्टं वितथं त्वनृतं वचः ३५३
सत्यं तथ्यमृतं सम्यगमूनि त्रिषु तद्वति ३५४
शब्दे निनादनिनदध्वनिध्वानरवस्वनाः ३५५
स्वाननिर्घोषनिर्ह्रादनादनिस्वाननिस्वनाः ३५६
आरवारावसंरावविरावा अथ मर्मरः ३५७
स्वनिते वस्त्रपर्णानां भूषणानां तु शिञ्जितम् ३५८
निक्वाणो निक्वणः क्वाणः क्वणः क्वणनमित्यपि ३५९

वचनको ॥–यत्त्वरितोदितं निरस्तं २ छीटावचनका ॥–सनिष्ठीवं लालायुक्तं तत् अम्बूकृतं १ थुकउडायेर बोलेका वचनको ॥–यदनर्थकमर्थशून्यं तदबद्धं स्यात् २ अर्थै नमिलने वचनको ॥—अनक्षरम्, अवाच्यम्, २ बोलन नहुने बचनको ॥ मृषार्थकमत्यन्ताभूतार्थकं तत् आहतं १ साह्रै भूटा वचनको नाम ॥—जस्तै 'एष बन्ध्यासुतो याति खपुष्पकृतशेखरः । मृगतृष्णाम्भसि स्नातः शशशृङ्गधनुर्धरः ॥' इत्यादि जान्नु ॥ म्लिष्टम्, अविस्पष्टम्, २ अस्पष्ठ वचनका नाम ॥–यदनृतं वचः तत् वितथमिति १ असत्य वचनको ॥ सत्यम्, तथ्यम्, ऋतम्, सम्यक्, ४ सत्यवचनका नाम। अमूनि तद्वति सत्यवति त्रिषु। यथा—सत्या स्त्री, सत्यः पुमान्, सत्यं कुलम्, ॥—शब्दः, निनादः, निनदः, ध्वनिः, ध्वानः, रवः, स्वनः, स्वानः, निर्घोषः, निर्ह्रादः, नादः, निस्वानः, निस्वनः, आरवः, आरावः, संरावः, विरावः १७ शब्दका (अवाज) का नाम॥-वस्त्रपर्णानां स्वनिते शब्दे मर्मरः १ वस्त्र र पातका शब्दको नाम ॥–भूषणानां नूपुरादीनां स्वनिते, शिञ्जितं १ गहनाका शब्दको (अवाज) को

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वीणायाः क्वणिते प्रादेः प्रक्वाणप्रक्वणादयः ३६०
कोलाहलः कलकलस्तिरश्चां वाशितं रुतम् ३६१
स्त्री प्रतिश्रुत्प्रतिध्वाने गीतं गानमिमे समे ३६२

इति शब्दादिवर्गः ॥ १०. अथ नाट्यवर्गः

निषादर्षभगान्धारषड्जमध्यमधैवताः ३६३
पञ्चमश्चेत्यमी सप्त तन्त्रीकण्ठोत्थिताः स्वराः ३६४
काकली तु कले सूक्ष्मे ध्वनौ तु मधुरास्फुटे ३६५
कलो मन्द्रस्तु गम्भीरे तारोऽत्युच्चैस्त्रयस्त्रिषु ३६६
नृणामुरसि मध्यस्थो द्वाविंशतिविधो ध्वनिः ❀❀
स मन्द्रः कण्ठमध्यस्थस्तारः शिरसि गीयते' ❀❀

नाम ॥ निक्वाणः, निक्वणः, क्वाणः, क्वणः, क्वणनम्, ७ विणाका शब्दका नाम ॥ प्रादेरुपसर्गात् ये प्रक्वाणः, प्रक्वणः, इत्यादयस्ते वीणाया एव क्वणिते ई २ पनि वीणाकै शब्दका नाम हुन् ॥—कोलाहलः, कलकलः २ कोकोहोलो शब्दका नाम ॥ तिरश्चां पक्षिणां रुतं शब्दः वाशितम् १ पक्षिका अवाजको नाम ॥—प्रतिश्रुत्, प्रतिध्यानः २ प्रतिध्वनिका नाम ॥ गीतम्, गानम् २ गानका नाम ॥

३६३-४३८, निषादः, ऋषभः, गान्धारः, षड्जः, मध्यमः, धैवतः, पञ्चमः, इत्यमी तन्त्रीभ्यः कण्ठेभ्यश्चोत्थिताः इ ७ गवैयाका कण्ठबाट उठेका र बीणाप्रभृतिबाट उठेका शब्दका नाम ॥ तेंस्मा निषादं नर्दन्ति गजाः, ऋषभं गावः, गान्धारं अजादयः, षड्जं मयूराः, मध्यमं क्रौञ्चाः, धैवतमश्वाः, पञ्चमं कोकिलाः इत्यादि जान्नु ॥—ईषत् कलः काकली ३ सूक्ष्म स्पष्ट स्वरका नाम ॥ मधुरः श्रुतिसुखः, स चासोवस्फुटोऽव्यक्ताक्षरः, एतादृशे ध्वनौ कल १ मीठो अस्पष्ट स्वरको नाम ॥ गम्भीरे ध्वनौ मन्द्र २ गम्भीर शब्दको नाम ॥ अत्युच्चैर्ध्वनौ तार १ अति उच्च स्वरको नाम ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

समन्वितलयस्त्वेकतालो वीणा तु वल्लकी ३६७
विपञ्ची सा तु तन्त्रीभिः सप्तभिः परिवादिनी ३६८
ततं वीणादिकं वाद्यमानद्धं मुरजादिकम् ३६९
वंशादिकं तु सुषिरं कांस्यतालादिकं घनम् ३७०
चतुर्विधमिदं वाद्यं वादित्रातोद्यनामकम् ३७१
मृदङ्गा मुरजा भेदास्त्वङ्क्यालिङ्ग्योर्ध्वकास्त्रयः ३७२
स्याद्यशःपटहो ढक्का भेरी स्त्री दुन्दुभिः पुमान् ३७३

त्रयः कलमन्द्रतारास्त्रिषु ३ तीनलिङ्गमा छन् ॥—यः सम्यगन्वितोऽनुगतो लयो गीतादिसाम्यं यत्र स समन्वितलयः, एकताल २ गाउनु बजाउनु नाच्नु ई ३ को तालभिलनुको नाम ॥—वीणा, वल्लकी, विपञ्ची ३ वीणाका नाम ॥—सा वीणा तु सप्तभिस्तन्त्रीभिरुपलक्षिता परिवादिनी ७ तार लागेका वीणाका नाम ॥—यद्वीणादिकं वाद्यं तत् ततं १ वीणा आदि बजाउने बाजाको नाम ॥ आदिना सैरन्ध्रीरावणप्रहस्तकिंनर्यादि लिईछन् ॥—यन्मुरजादिकं मृदङ्गादिकं आदिना पटहादि, मुखे चर्मणा बध्यते तदानद्धं मुखमा १ छालालायेर बजाउने मुरज आदि बाजाको नाम ॥—शादिकम् । आदिना शङ्खादि । तत्सुषिरं १ वंशी बाँसुरी शनै आदि फुकेर बजाउने सुषिरवाद्यको नाम ॥—यत्कांस्यमयतालादिकं, आदिना घण्टाझल्लर्यादि तद्घनं १ ठोकेर बजाउनु पर्ने साह्रा घण्टा झ्याली इत्यादि घनवाद्यको नाम ॥—इदं ततादिकं चतुर्विधं वाद्यं वादित्रातोद्यनामकं वादित्रमातोद्यं च नाम यस्य तत् पूर्वोक्त ततं, आनद्धं, सुषिरं, घनं, ४ सामान्य बाजाका नाम ॥—मृदङ्गाः, मुरजाः २ मृदङ्गका नाम ॥ बहुविधत्वाद्बहुवचनम् ॥—अङ्क्यः, आलिङ्ग्यः, ऊर्ध्वकः ३ मृदङ्गका भेद हुन् हर्रांकारवाला अङ्क्यः जौकोमध्यभागजस्तो उर्ध्वकः गोपुच्छाकार वाला आलिङ्ग्यः हुन्छन्॥ यशसे य आदौ पटहो वाद्यते स यशःपटहः। स एव ढक्का यशपटहः, २ नगराका नाम ॥—भेरी, दुन्दुभिः २ कर्नालका नाम ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

आनकः पटहोऽस्त्री स्यात्कोणो वीणादिवादनम् ३७४
वीणादण्डः प्रवालः स्यात्ककुभस्तु प्रसेवकः ३७५
कोलम्बकस्तु कायोऽस्या उपनाहो निबन्धनम् ३७६
वाद्यप्रभेदा डमरुमड्डुडिण्डिमझर्झराः ३७७
मर्दलः पणवोऽन्ये च नर्तकीलासिके समे ३७८
विलम्बितं द्रुतं मध्यं तत्त्वमोघो घनं क्रमात् ३७९
तालः कालक्रियामानं लयः साम्यमथास्त्रियाम् ३८०
ताण्डवं नटनं नाट्यं लास्यं नृत्यं च नर्तने ३८१
तौर्यत्रिकं नृत्यगीतवाद्यं नाट्यमिदं त्रयम् ३८२

आनकः, पटहः २ दमाहाका नाम ।।—वीणादि वाद्यते येन तद्धनुराकृति काष्ठं कोण ।।—वीणादण्डः प्रवालः २ वीणा बजाउने दण्डका नाम ।।—ककुभः, प्रसेवकः २ वीणाका तलतिर छालाले बाँधेका भाण्डका ।।—अस्या वीणायाः कायस्तन्त्रीरहितोदण्डादिसमुदायः कोलम्बकः १ तारनलायेका केवल वीणाको ।। —यत्र वीणाप्रान्ते तन्त्र्यो निबध्यन्ते तन्निबन्धनम् , उपनाहः १ वीणाको तार बाँधने किलाको ।।—डमरुः, मड्डुः, डिण्डिमः, झर्झरः, मर्दलः, पणवः ६ डमरू, ठूलोडमरू, डिब्डिबे, (झाँज) झ्याली, मादल, तम्बुरा क्रमशः ६ का छवटा नाम ।। हुडुकः, गोमुखः आदिपनिछन् । अन्ये च हुड्डुक-गोमुखादयः सन्ति ।।—नर्तकी, लासिका, २ नाँच्ने स्त्रीका नाम ।।—कर-चरणादिभिर्यद्विलम्बितं नृत्यादिकं तत् तत्त्वं १ (ढीलो) गरियेका नृत्य गीतवाद्यको नाम ।।—यद्द्रुतं शीघ्रं नृत्यादिकं तत् ओघः १ छीटो गरिये-का नृत्यगीत वाद्यको नाम ।।—यन्मध्यं न विलम्बितं नापि द्रुतं तत् घनं १ मध्यम न ढीलो नछीटो रितले गरियेका नृत्य गीत वाद्यको नाम ।।—कालक्रिययोर्मानं नियमहेतुः ताल १ काल (टायम) र क्रिया नर्तन गान वादन प्रमाण तालको नाम ।।—गीतवाद्यपादादिन्यासानां क्रियाकालयोः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अत्रुंसश्च भ्रुकुंसश्च भ्रूकुंसश्चेति नर्तकः ३८३
स्त्रीवेषधारी पुरुषो नाट्योक्तौ गणिकाज्जुका ३८४
भगिनीपतिरावुत्तो भावो विद्वानथावुकः ३८५
जनको युवराजस्तु कुमारो भर्तृदारकः ३८६
राजा भट्टारको देवस्तत्सुता भर्तृदारिका ३८७
देवी कृताभिषेकायामितरासु तु भट्टिनी ३८८
अब्रह्मण्यमवध्योक्तौ राजश्यालस्तु राष्ट्रियः ३८९
अम्बा माताऽथ बाला स्याद्वासूरार्यस्तु मारिषः ३९०

साम्यं लय १ लय नाच गान बाजाहरूको यथोचित मेलको नाम ॥— ताण्डवम्, नटनम्, नाट्यम्, लास्यम्, नृत्यम्, नर्तनम् ६ नाचका नाम ॥ —नृत्य-गीत वाद्यमितीदं त्रयं मिलित्वा तौर्यत्रिकं १ नाँच गान वाद्य इन्का समुदायका नाम ॥ यः स्त्रीवेषधारी नर्तकः पुरुषस्तत्र अत्रुंसः, भ्रुकुंसः, भ्रूकुंसः ३ नाँच्नलाई स्त्रीको भेषधारणगर्ने पुरुषका नाम ॥ नाट्योक्तौ नाट्य-प्रकरणे, नाट्यादन्यत्र प्रयोगो नास्ति अब उप्रान्तका अङ्गहारोङ्ग विक्षेप भन्ने श्लोक देखी पैलेका शब्दको प्रयोग प्रायः नाटकमा मात्र गरिन्छ ॥ या गणिका सा अज्जुका १ नाँचकी वेश्याको नाम ॥—भगिन्याः पतिः आवुत्त १ भिनाजू या बहिने जुवाईंको नाम ॥—यो विद्वान् स भाव १ विद्वान्को नाम ॥—जनकस्तु आवुक १ पिताको नाम ॥—युवराजस्तु कुमारः, भर्तृदारकः २ राजकुमारका नाम ॥—भट्टारकः, देवः २ राजाका नाम ॥—तस्य राज्ञः सुता भर्तृदारिका १ राजकन्याका नाम ॥—कृतोऽभिषेको यस्यास्तस्यां राज्ञ्यां देवी १ पट्टाभिषेकभयेकीरानी (पटरानी) को नाम ॥ —इतरासु राज्ञीषु भट्टिनी १ अरुरानीको नाम ॥—अवध्यस्य वधानर्हस्य ब्राह्मणादेरुक्तौ दोषोक्तिकरणे अब्रह्मण्यं १ अवध्य ब्राह्मण मारेको दोष लगाउनका नाम ॥ दुहाई (गुहाईका) नाम ॥—राज्ञः श्यालो राष्ट्रिय १ राजाका शालाको नाम ॥-अम्बा, माता २ आमाका नाम ॥-बाला, वासूः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अत्तिका भगिनी ज्येष्ठा निष्ठानिर्वहणे समे ३९१
हण्डे हञ्जे हलाह्वाने नीचां चेटीं सखीं प्रति ३९२
अङ्गहारोऽङ्गविक्षेपो व्यञ्जकाभिनयौ समौ ३९३
निर्वृत्ते त्वङ्गसत्त्वाभ्यां द्वे त्रिष्वाङ्गिकसात्त्विके ३९४
शृङ्गारवीरकरुणाद्भुतहास्यभयानकाः ३९५
बीभत्सरौद्रौ च रसाः शृङ्गारः शुचिरुज्ज्वलः ३९६
उत्साहवर्धनो वीरः कारुण्यं करुणा घृणा ३९७
कृपा दयाऽनुकम्पा स्यादनुक्रोशोऽप्यथो सहः ३९८
हासो हास्यं च बीभत्सं विकृतं त्रिष्विदं द्वयम् ३९९

---

२ कुमारी (ठिटिका) नाम ।।—आर्यः, मारिषः २ आफुले मान्ने सूत्रधारका पार्श्ववर्तीका नाम ।।—या ज्येष्ठा भगिनी सा अत्तिका १ दीदीको नाम ।।—निष्ठा, निर्वहणम् २ नाटक समाप्ति या पाँचौं सन्धि विशेषका नाम ।।—नीचां प्रत्याह्वाने हण्डे, १ साना दर्जाका स्त्रीलाई बोलाउने संबोधन पदको नाम ।। चेटीं प्रति आह्वाने हञ्जे, १ केटीलाई बोलाउने संबोधन पदको नाम ।। सखीं प्रत्याह्वाने हला १ सखीलाई बोलाउने संबोधन पदको नाम ।। उपरोक्त ३ शब्द अव्ययमा छन् ।।—अङ्गहारः, अङ्गविक्षेपः २ नाँच्दा अँलाहातपाउ इत्यादि चलाउनका नाम ।।—व्यञ्जकः, अभिनयः २ नेत्र हातद्वारा मनको अभिप्राय प्रकटगर्नुका नाम ।।—अङ्गेन निर्वृत्ते निष्पन्ने कर्मणि आङ्गिकम् १ अङ्गका चेष्टा विशेष कटाक्ष आदिको नाम ।। सत्त्वेनान्तःकरणेन निर्वृत्ते सात्त्विकम् १ सत्वगुणवाट उत्पन्न स्तम्भ स्वेद रोमाञ्च स्वरभङ्ग आदिको नाम ।। इ २ शब्दपनि ३ लिङ्गी छन् ।।—शृङ्गारः, वीरः, करुणः, अद्भुतः, हास्यः, भयानकः, बीभत्सः, रौद्रः ८ रसका नाम ।।—शृङ्गारः, शुचिः, उज्ज्वलः ३ शृङ्गाररसका नाम ।।—उत्साहवर्धनः, वीरः २ वीररसका नाम ।।—कारुण्यम्, करुणा, घृणा, कृपा, दया, अनुकम्पा, अनुक्रोशः ७ करुणरस (दयाका) नाम ।। हसः, हासः, हास्यम् ३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विस्मयोऽद्भुतमाश्चर्यं चित्रमप्यथ भैरवम् ४००
दारुणं भीषणं भीष्मं घोरं भीमं भयानकम् ४०१
भयंकरं प्रतिभयं रौद्रं तूग्रममी त्रिषु ४०२
चतुर्दश दरस्त्रासो भीतिर्भीः साध्वसं भयम् ४०३
विकारो मानसो भावोऽनुभावो भावबोधकः ४०४
गर्वोऽभिमानोऽहंकारो मानश्चित्तसमुन्नतिः ४०५
'दर्पोऽवलेपोऽवष्टम्भश्चित्तोद्रेकः स्मयो मदः' ❋❋
अनादरः परिभवः परीभावस्तिरस्क्रिया ४०६
रीढावमाननावज्ञावहेलनमसूर्क्षणम् ४०७

हास्यरस :हँसाईका नाम ।।—बीभत्सम्, विकृतम् २ बीभत्सरस घिन लागने वस्तुका नाम ।। इदं द्वयं रसे पुंसि रस अर्थमा पुं० रसवान् अर्थमा ३ लिङ्गी छन् ।।—विस्मयः, अद्भुतम्, आश्चर्यम्, चित्रम् ४ अद्भुतरस आश्चर्यका नाम ।।—भैरवम्, दारुणम्, भीषणम्, भीष्मम्, घोरम्, भीमम्, भयानकम्, भयंकरम्, प्रतिभयम्, ९ भयानक रस (डर लाग्ने वस्तु) का नाम ।।—रौद्रम्, उग्रम्, २ रौद्ररस सारै डर-लाग्ने वस्तुका नाम ।।—अमी अद्भुतादय उग्रान्ताश्चतुर्दश शब्दाः रसे पुंसि । तद्वति तु त्रिषु वाच्यलिङ्गाः ई १४ शब्द रसलाई कंहदा पुं० रसवान् लाई कंहदा ३ लिङ्गमा छन् ।।—दरः, त्रासः, भीतिः, भीः, साध्वसम्, भयम्, ६ भय (डरका) नाम ।।—मानसः, मनः संबन्धि विकारो भाव १ मनोविकार रति, हास, शोक इत्यादिको नाम ।।—यो भावबोधकश्चित्तविकारस्य प्रकाशकः कटाक्षादिः सोऽनुभाव १ मनकोविकारलाई पैदागर्ने इत्यादि सूचक रोमाञ्च आदिको नाम ।।—गर्वः, अभिमानः, अहंकारः, ३ अभि-मान घमण्डका नाम ।।—चित्तस्य समुन्नतिः परस्माद्युत्कर्षचिन्तनेनौन्नत्यं मान १ अरूभन्दा ठूलोछु भन्नेसंझनु चिन्तोन्नतिको नाम ।।—अनादरः, परिभवः, परीभावः, तिरस्क्रिया, रीढा, अवमानना, अवज्ञा, अवहेलनम्, असूर्क्ष-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मन्दाक्षं ह्रीस्त्रपा व्रीडा लज्जा साऽपत्रपाऽन्यतः ४०८
क्षान्तिस्तितिक्षाऽभिध्या तु परस्य विषये स्पृहा ४०९
अक्षान्तिरीर्ष्याऽसूया तु दोषारोपो गुणेष्वपि ४१०
वैरं विरोधो विद्वेषो मन्युशोकौ तु शुक् स्त्रियाम् ४११
पश्चात्तापोऽनुतापश्च विप्रतीसार इत्यपि ४१२
कोपक्रोधामर्षरोषप्रतिघा रुट्क्रुधौ स्त्रियौ ४१३
शुचौ तु चरिते शीलमुन्मादश्चित्तविभ्रमः ४१४
प्रेमा ना प्रियता हार्दं प्रेम स्नेहोऽथ दोहदम् ४१५
इच्छा काङ्क्षा स्पृहेहा तृड् वाञ्छा लिप्सा मनोरथः ४१६
कामोऽभिलाषस्तर्षश्च सोऽत्यर्थं लालसा द्वयोः ४१७

णम्, ६ अनादरका नाम ॥—मन्दाक्षम्, ह्रीः, त्रपा, व्रीडा, लज्जा, ५ लज्जा (लाज) का नाम ॥—सा लज्जा, अन्यतः परस्माच्चेत् अपत्रता १ आफूभन्दा ठूलादेखी भयेकालाजको ॥—क्षान्तिः, तितिक्षा, २ अर्काको उन्नतिलाई सहनगर्नुका नाम ॥—परस्य विषये परकीयधने स्पृहा अभिध्या अर्काको धन सम्पत्ति आदिको इच्छागर्नुको नाम ॥—अक्षान्तिः, ईर्ष्या, २ अर्काका सम्पत्तिकोसहन न गर्नुका नाम ॥—गुणेष्वपि दोषारोपः असूया १ गुणी जनमा दोषारोपण गर्नुका नाम ॥—वैरम्, विरोधः, विद्वेषः, ३ वैरभावका नाम ॥—मन्युः, शोकः, शुक्, ३ शोकका नाम ॥—पश्चात्तापः, अनुतापः, विप्रतीसारः, ३ पश्चात्ताप (पछीता) का नाम ॥—कोपः, क्रोधः, अमर्षः, रोषः, प्रतिघः, रुट्, क्रुद्धः, ७ क्रोधका नाम ॥—रुट्-क्रुधौ स्त्रीलिङ्गमाछन् ॥—शुचौ शुद्धे चरित आचरणे शुद्धाचरणः, शीलम् १ असल स्वभाव आचरणका नाम ॥—उन्मादः, चित्तविभ्रमः, २ पागलपना र बहुलाउनुका ॥—प्रेमा, प्रियता, हार्दम्, प्रेम, स्नेहः, ५ प्रेमका नाम ॥—'प्रेमा' पुमान्, स्नेह २ पुंलिङ्ग माछन् ॥—दोहदम्, इच्छा, काङ्क्षा, स्पृहा, ईहा,-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

उपाधिर्ना धर्मचिन्ता पुंस्याधिर्मानसी व्यथा ४१८
स्याच्चिन्ता स्मृतिराध्यानमुत्कण्ठोत्कलिके समे ४१९
उत्साहोऽध्यवसायः स्यात्स वीर्यमतिशक्तिभाक् ४२०
कपटोऽस्त्रीव्याजदम्भोपधयश्छद्मकैतवे ४२१
कुसृतिर्निकृतिः शाठ्यं प्रमादोऽनवधानता ४२२
कौतूहलं कौतुकं च कुतुकं च कुतूहलम् ४२३
स्त्रीणां विलासबिब्बोकविभ्रमा ललितं तथा ४२४
हेला लीलेत्यमी हावाः क्रियाः श‍ृङ्गारभावजाः ४२५

तृट्, वाञ्छा, लिप्सा, मनोरथः, कामः, अभिलाषः, तर्षः, १२ इच्छाका नाम ॥—स तर्षो महांश्चेत् लालसा १ ठूलो इच्छा (लालच) को नाम ॥ स्त्रीपुंसयोः पु० स्त्री०माछ ॥—उपाधिः, धर्मचिन्ता, २ धर्मसंझना का नाम 'उपाधिः' पु० माछ ॥—आधिः, मानसीव्यथा, २ मनको व्यथा दुःखका नाम ॥—चिन्ता, स्मृतिः, आध्यानम्, ३ स्मरण (संझना) का नाम ॥—उत्कण्ठा, उत्कलिका, २ उत्कण्ठाका (प्रबलइच्छा) का॥—उत्साहः, अध्यवसायः, २ उत्साहका नाम ॥—येन कृत्वा असाध्यसाधनेऽप्युद्यतो भवति, स उत्साहोऽतिशक्तिभाक् वीर्यम् २ अतिशक्ति सहित उत्साहका नाम ॥—कपटः, व्याजः, दम्भः, उपाधिः, छद्म, कैतवम्, कुसृतिः, निकृतिः, शाठ्यम्, ९ छलकपटका नाम ॥—प्रमादः, अनवधानता, २ असावधानि भूलचुक्का नाम॥–कौतूहलम्, कौतुकम्, कुतुकम्, कुतूहलम्, ४ कौतूक(खेल) तमासा जादू लहड इत्यादि आश्चर्यजनकका नाम ॥—विलासः, बिब्बोकः [बिव्वोकः] विभ्रमः, ललितम्, हेला, लीला, ६ यौवनावस्था की अनुरागिणी भयेकी स्त्री हरूमा हुने विलास * बिव्वोक † विभ्रम ‡ ललित + हेला— लीला ÷ इत्यादि चेष्टाका नाम ॥ विशेष ठुला अमर-कोशको टिपणीमा छन् ॥ स्त्रीणां श‍ृङ्गारभावजाः, श‍ृङ्गाररसमुद्भूताः क्रियाः चेष्टाः हावा १ स्त्री हरूका

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

द्रवकेलिपरीहासाः क्रीडा लीला च नर्म च ४२६
व्याजोऽपदेशो लक्ष्यं च क्रीडा खेला च कूर्दनम् ४२७
घर्मो निदाघः स्वेदः स्यात्प्रलयो नष्टचेष्टता ४२८
अवहित्थाकारगुप्तिः समौ संवेगसंभ्रमौ ४२९
स्यादाच्छुरितकं हासः सोत्प्रासः स मनाक् स्मितम् ४३०
मध्यमः स्याद्विहसितं रोमाञ्चो रोमहर्षणम् ४३१
क्रन्दितं रुदितं क्रुष्टं जृम्भस्तु त्रिषु जृम्भणम् ४३२
विप्रलम्भो विसंवादो रिङ्गणं स्खलनं समे ४३३
स्यान्निद्रा शयनं स्वापः स्वप्नः संवेश इत्यपि ४३४

स्वभाववाटै उत्पन्नभयेका चेष्टाको नाम ॥—द्रवः, केलिः, परीहासः, क्रीडा, लीला, नर्म, ६ खेल कूद डट्टाका नाम ॥—व्याजः, अपदेशः, लक्ष्यम्, ३ निहुँ (बहानाका) नाम ॥—क्रीडा, खेला, कूर्दनम्, ३ बाल-लीला खेल कूदका नाम ॥—घर्मः, निदाघः, स्वेदः, ३ पसीनाका ॥—प्रलयः, नष्टचेष्टता, २ मूर्च्छाका ॥—अवहित्था, आकारगुप्तिः, २ आफ्नु अह्नुभार लुकाउनुका ॥—संवेगः, संभ्रमः, २ हर्षादिले कार्यमा हड्वड गर्नुका नाम ॥—सोत्प्रासः आच्छुरितकं २ मनमा केही अभिप्रायलाई लियेर भयेकाहास्यको नाम ॥—स हासो मनागीषच्चेत् स्मितं १ मन्दहास्य उत्तमदर्जाको मुसुमुसु हास्यको नाम ॥—स हासो मध्यमश्चेदनल्पाधिकस्तर्हि विहसितं १ मध्यमदर्जाका हास्यको नाम ॥—रोमाञ्चः, रोमहर्षणम्, २ रोमाञ्च शरीरमा काँढा उम्रनुका नाम ॥—क्रन्दितम्, रुदितम्, क्रुष्टम्, ३ रुनाका नाम ॥—जृम्भः, जृम्भणम्, २ हाईका नाम। जृंभः त्रि.लिं.माछ॥-विप्रलम्भः, विसंवादः, ई २ ठगाई भनेको कुरोपुरानगर्नुका नाम ॥—रिङ्गणम्, स्खलनम्, २ स्वधर्ममार्गवाट प्रतिकूलहुनु चिप्लिनु लड्नुका नाम ॥—निद्रा, शयनम्, स्वापः, स्वप्नः, संवेशः, ५ निद्राका

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तन्द्री प्रमीला भ्रकुटिर्भ्रुकुटिर्भ्रूकुटिः स्त्रियाम् ४३५
अदृष्टिः स्यादसौम्येऽक्ष्णि संसिद्धिप्रकृती त्विमे ४३६
स्वरूपं च स्वभावश्च निसर्गश्चाथ वेपथुः ४३७
कम्पोऽथ क्षण उद्धर्षो मह उद्धव उत्सवः ४३८

इति नाट्यवर्गः ॥ ११. अथ पातालभोगिवर्गः

अधोभुवनपातालं बलिसद्म रसातलम् ४३९
नागलोकोऽथ कुहरं शुषिरं विवरं बिलम् ४४०
छिद्रं निर्व्यथनं रोकं रन्ध्रं श्वभ्रं वपा शुषिः ४४१
गर्तावटौ भुवि श्वभ्रे सरन्ध्रे शुषिरं त्रिषु ४४२
अन्धकारोऽस्त्रियां ध्वान्तं तमिस्रं तिमिरं तमः ४४३
ध्वान्ते गाढेऽन्धतमसं क्षीणेऽवतमसं तमः ४४४

नाम ॥—तन्द्री, प्रमीला, २ निद्राकाआदि र अन्तमा हुने आलस्यका (उङ्नाका) नाम ॥ भ्रकुटिः, भ्रुकुटिः भ्रूकुटिः, ३ क्रोध आदिले आँखा तर्नुका नाम ॥—असौम्येऽक्ष्णि सरोषे चक्षुषि अदृष्टि १ डरलाग्दा आँखाका नाम ॥—संसिद्धिः, प्रकृतिः, स्वरूपम्, स्वभावः, निसर्गः, ५ स्वभावका नाम ॥—वेपथुः, कम्पः, २ कम्पका नाम ॥—क्षणः, उद्धर्षः, महः, उद्धवः उत्सवः, ५ उत्सवका नाम । महः, अकारान्तछ ॥ इति नाट्यवर्गः ।

४३९–४६०, अधोभुवनम्, पातालम्, बलिसद्म, रसातलम्, नागलोकः ५ पातालका नाम ॥—कुहरम्, शुषिरम्, विवरम्, विलम्, छिद्रम्, निर्व्यथनम्, रोकम्, रन्ध्रम्, श्वभ्रम्, वपा, शुषिः, ११ छिद्र (प्वाल) का नाम ॥—गर्तः, अवटः २ प्वाल परेका वस्तुका (खाडल) का नाम ॥—सरन्ध्रेरन्ध्रयुक्ते वस्तुनि, सुषिरं, १ प्वालपरेका बाँस आदि वस्तुको नाम ॥—अन्धकारः, ध्वान्तम्, तमिस्रम्, तिमिरम्, तमः, ५ अन्धकारका नाम ॥ यो तिनैलिङ्गमाछ ॥—'अंधकारः' नपुंसकपुंलिगमाछ ॥—

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विष्वक् संतमसं नागाः काद्रवेयास्तदीश्वरः ४४५
शेषोऽनन्तो वासुकिस्तु सर्पराजोऽथ गोनसे ४४६
तिलित्सः स्यादजगरे शयुर्वाहस इत्युभौ ४४७
अलगर्दो जलव्यालः समौ राजिलडुण्डुभौ ४४८
मालुधानो मातुलाहिर्निर्मुक्तो मुक्तकञ्चुकः ४४९
सर्पः पृदाकुर्भुजगो भुजंगोऽहिर्भुजंगमः ४५०
आशीविषो विषधरश्चक्री व्यालः सरीसृपः ४५१
कुण्डली गूढपाच्चक्षुःश्रवाः काकोदरः फणी ४५२
दर्वीकरो दीर्घपृष्ठो दन्दशूको बिलेशयः ४५३
उरगः पन्नगो भोगी जिह्मगः पवनाशनः ४५४
'लेलिहानो द्विरसनो गोकर्णः कञ्चुकी तथा **

गाढे ध्वान्ते सातिशये तमसि अन्धतमसः १ घनान्धकारको नाम ॥—क्षीणे ध्वान्ते अवतमसि १ घटेका अन्धकारको नाम ॥—विष्वक् तमः सर्वं व्यापि ध्वान्तं संतमसम् १ सवैतिरफैलियेका व्यापक अन्धकारको नाम ॥—नागाः, काद्रवेयाः, २ नागका नाम ॥—तदीश्वरो नागानामीशः, शेषः, अनन्तः, २ नागाधिराज शेषनागको नाम ॥—वासुकिः, सर्पराजः २ वासुकिः (नागकाराजाका) नाम ॥—गोनसः, तिलित्सः २ गाईको जस्तो नाकहुने सानुजातिका सर्पविशेषका नाम ॥—अजगरः, शयुः, वाहसः ३ अजिंगरका नाम ॥—अलगर्दः, जलव्यालः २ पाँनीसाँपका नाम ॥—राजिलः, डुण्डुभः २ विषनहुने दुईमुखे सर्पका नाम ॥—मालुधानः, मातुलाहिः २ साँभे सर्पका नाम ॥—निर्मुक्तः; मुक्तकञ्चुकः २ काँचुली छोडेका सर्पका नाम ॥—सर्पः, पृदाकुः, भुजगः, भुजंगः, अहिः, भुजङ्गमः, आशीविषः, विषधरः, चक्री, व्यालः, सरीसृपः, कुण्डली, गूढपात् , चक्षुःश्रवाः, काकोदरः, फणी, दर्वीकरः, दीर्घपृष्ठः, दन्दशूकः, बिलेशयः, उरगः, पन्नगः,

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कुम्भीनसः फणधरो हरिर्भोगधरस्तथा **

अहेः शरीरं भोगः स्यादाशीरप्यहिदंष्ट्रिका' **

त्रिष्वाहेयं विषास्थ्यादि स्फटायां तु फणा द्वयोः ४५५

समौ कञ्चुकनिर्मोकौ क्ष्वेडस्तु गरलं विषम् ४५६

पुंसि क्लीबे च काकोलकालकूटहलाहलाः ४५७

सौराष्ट्रिकः शौक्लिकेयो ब्रह्मपुत्रः प्रदीपनः ४५८

दारदो वत्सनाभश्च विषभेदा अमी नव ४५९

विषवैद्यो जाङ्गुलिको व्यालग्राह्यहितुण्डिकः ४६०

इति पातालभोगिवर्गः] १२. अथ नरकवर्गः ।

स्यान्नारकस्तु नरको निरयो दुर्गतिः स्त्रियाम् ४६१

भोगी, जिह्मगः, पवनाशनः २५ साधारणसाँपका नाम ।।—यद्विषास्थ्यादि अहिभवं तत् आहेयं १ सर्पकाशरीरमा भयेका विष हड्डी आदि अवयवको नाम ।।—स्फटा, फणा २ सर्पका फँणाका नाम ।। दुवै स्त्रीलिङ्ग पुंलिङ्गमा छन् ।।—कञ्चुकः, निर्मोकः २ सर्पका काँचुलीका नाम ।।—क्ष्वेडः, गरलम्, विषम् ३ विषका ।।—काकोलः, कालकूटः, हलाहलः, सौराष्ट्रिकः, शौक्लिकेयः, ब्रह्मपुत्रः, प्रदीपनः, दारदः, वत्सनाभः ६ स्थावरविषका ९ भेद छन् विष २ प्रकारका छन् स्थावर विष जङ्गम विष स्थावर विष हिमालयका अगल बगलमा वृक्ष छन् तिनका पात चोप बोक्रो खोटो इत्यादि विष हुन्छ ।।|जङ्गमः विष हुने सर्प बिच्छि अरिंगाल वच्छिउँ वारूलो मौरी बाँघ स्याल आदिको हुन्छ स्थावरविष ५५ प्रकारको र जङ्गमविष १६ प्रकारको छ ।। यो आयुर्वेदीय सुश्रुत ग्रन्थमा छ ।। विषवैद्यः, जाङ्गुलिकः २ विषको औषधीगर्ने वैद्यको नाम ।। —व्यालग्राही, अहितुण्डिकः २ सर्पसमातेर नचाउँने गारुडीका नाम ।। इति पातालभोगीवर्गः ।।

४६१–४६७. नारकः, नरकः, निरयः, दुर्गतिः, ४ नरकका नाम ।।—

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तद्भेदास्तपनावीचिमहारौरवरौरवाः ४६२
सङ्घातः कालसूत्रं चेत्याद्याः सत्वास्तु नारकाः ४६३
प्रेता वैतरणी सिन्धुः स्यादलक्ष्मीस्तु निर्ऋतिः ४६४
विष्टिराजूः कारणा तु यातना तीव्रवेदना ४६५
पीडा बाधा व्यथा दुःखमामनस्यं प्रसूतिजम् ४६६
स्यात्कष्टं कृच्छ्रमाभीलं त्रिष्वेषां भेद्यगामि यत् ४६७

इति नरकवर्गः ॥ १३. अथ वारिवर्गः

समुद्रोऽब्धिरकूपारः पारावारः सरित्पतिः ४६८
उदन्वानुदधिः सिन्धुः सरस्वान् सागरोऽर्णवः ४६९
रत्नाकरो जलनिधिर्यादःपतिरपांपतिः ४७०
तस्य प्रभेदाः क्षीरोदो लवणोदस्तथापरे ४७१

तपनः, अवीचिः, महारौरवः, रौरवः, संघातः, कालसूत्रम् ६ अनेकप्रकारका नरकमध्ये प्रसिद्ध ६ नरकका नाम ॥ आद्यशब्दात् तामिस्रकुम्भीपाकादयः ॥—नारका नरके भवाः सत्त्वाः प्राणिनः प्रेता १ नरकवासीको नाम ॥—नारकीनदी वैतरणी २ वैतरणी नदीका नाम ॥—नारक्यलक्ष्मीरशोभा निर्ऋति १ नरककी अलच्छीनी देवीको नाम ॥—विष्टिः, आजू २ बेगारी झाराका नाम ॥—कारणा, यातना, तीव्रवेदना, ३ नरका ठूलासजाय (दुख) का नाम ॥—पीडा, बाधा, व्यथा, दुःखम्, आमनस्यम्, प्रसूतिजम्, कष्टम्, कृच्छ्रम्, आभीलम्, ९ दुखका नाम ॥—एषां मध्ये यद्दुःखादिकं भेद्यगामि विशेष्यवृत्ति तत्त्रिषु । जस्तै—'सेयं सेवा दुःखा च बहुरूपा', 'सोऽयं दुःखसुतोऽगुणः', 'सर्वं दुःखं विवेकिनः' इत्यादि जान्नु ॥

४६८–५५२, समुद्रः, अब्धिः, अकूपारः, पारावारः, सरित्पतिः, उदन्वान्, उदधिः, सिन्धुः, सरस्वान्, सागरः, अर्णवः, रत्नाकरः, जलनिधिः, यादःपतिः, अपांपतिः १५ समुद्रका नाम ॥—तस्य समुद्रस्य प्रभेदास्तु—क्षीरोदः, लवणोदः,

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

आपः स्त्री भूम्नि वार्वारि सलिलं कमलं जलम् ४७२
पयः कीलालममृतं जीवनं भुवनं वनम् ४७३
कबन्धमुदकं पाथः पुष्करं सर्वतोमुखम् ४७४
अम्भोऽर्णस्तोयपानीयनीरक्षीराम्बुशम्बरम् ४७५
मेघपुष्पं घनरसस्त्रिषु द्वे आप्यमम्मयम् ४७६
भङ्गस्तरङ्ग ऊर्मिर्वा स्त्रियां वीचिरथोर्मिषु ४७७
महत्सूल्लोलकल्लोलौ स्यादावर्तोऽम्भसां भ्रमः ४७८
पृषन्तिबिन्दुपृषताः पुमांसो विप्रुषः स्त्रियाम् ४७९
चक्राणि पुटभेदाः स्युर्भ्रमाश्च जलनिर्गमाः ४८०
कूलं रोधश्च तीरं च प्रतीरं च तटं त्रिषु ४८१

तथापरे दध्युद-घृतोद-सुरोद-इक्षूद-स्वादूदाः क्षीरोदआदि ७ समुद्रका १-१ नाम ॥—आपः, वाः, वारि, सलिलम्, कमलम्, जलम्, पयः, कीलालम्, अमृतम्, जीवनम्, भुवनम्, वनम्, कबन्धम्, उदकम्, पाथः, पुष्करम्, सर्वतोमुखम्, अम्भः, अर्णः, तोयम्, पानीयम्, नीरम्, क्षीरम्, अम्बु, शम्बरम्, मेघपुष्पम्, घनरसः २७ पानीका नाम ॥ तत्र 'आपः' स्त्रियां बहुत्वे च नित्यम् ॥—आप्यम्, अम्मयम् २ पानीबाट बनेका बरफ, सर्वत आदिका नाम ॥ तीनैलिङ्गमा छन् ॥—भङ्गः, तरङ्गः, ऊर्मिः, वीचिः ४ तरङ्गका नाम ॥—उल्लोलः, कल्लोलः २ ठूला तरङ्गका नाम ॥—अम्भसां भ्रमो मण्डलाकारेण भ्रमणम् आवर्तः १ भुँमरीको नाम ॥—पृषन्ति, बिन्दवः, पृषतः, विप्रुषः ४ पानीकाछीटा (बिन्दु) का नाम ॥—तत्र 'पृषत्' क्लीबे, 'बिन्दु-पृषतौ' पुंसि, 'विप्रुट्' स्त्री० ॥—चक्राणि, पुटभेदाः, भ्रमाः, जलनिर्गमाः ४ भुँमरीपरेर पानी तलखादिनुका नाम ॥ अन्तका २ नाम भङ्गालाकाछुन् कूलम्, रोधः, तीरम्, प्रतीरम्, तटम् ५ तीरका नाम । 'तटं' त्रिलिङ्गम् ॥—

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पारावारे परार्वाची तीरे पात्रं तदन्तरम् ४८२
द्वीपोऽस्त्रियामन्तरीपं यदन्तर्वारिणस्तटम् ४८३
तोयोत्थितं तत्पुलिनं सैकतं सिकतामयम् ४८४
निषद्वरस्तु जम्बालः पङ्कोऽस्त्री शादकर्दमौ ४८५
जलोच्छ्वासाः परीवाहाः कूपकास्तु विदारकाः ४८६
नाव्यं त्रिलिङ्गं नौतार्ये स्त्रियां नौस्तरणिस्तरिः ४८७
उडुपं तु प्लवः कोलः स्रोतोऽम्बुसरणं स्वतः ४८८
आतरस्तरपण्यं स्याद्द्रोणी काष्ठाम्बुवाहिनी ४८९
सांयात्रिकः पोतवणिक् कर्णधारस्तु नाविकः ४९०

परं च अर्वाक् च परार्वाची तीरे क्रमेण पारावारे १ पारी वारी दुवै पट्टिका तीरको नाम ।। नद्याः परतीरं पारम् । नदीका पारी पट्टिका तीरको नाम ।। अर्वाक् तीरम् आवारं वारी पट्टिका तीरको नाम ।।—तयो पारावारयोरन्तरं मध्यं पात्रं १ दुई तीरको मौझ (पाट) को नाम ।।—वारिणोऽन्तर्मध्ये यत्तटं तत् द्वीपः, अन्तरीपम्, २ द्वीपः (टापू) का नाम ।।—तोयोत्थितं तोयक्रमेणोत्थं तत् पुलिनं १ भरखर पानीलेछोडेका नदीकातीरप्रदेशको नाम ।।—सैकतम्, सिकतामयम्, २ बालु धेरैभयेका प्रदेशका नाम ।।—निषद्वरः, जम्बालः, पङ्कः, शादः, कर्दमः, ५ हिलाका नाम ।। 'पङ्कः' पुंनपुंसकयोः पुं. नं. मा छ ।।—जलोच्छ्वासाः, परीवाहाः, २ पानीका निकाशका नाम ।।—कूपकाः, विदारकाः २ पानीका निमित्त बालुमा खनेर बनायेका खाल्डाका नाम ।।—नौतार्यें नावा तारितुमर्हे जलादौ नाव्यम् १ नाउले तर्नयोग्य नदी आदिको नाम ।।—नौः, तरणिः, तरिः ३ नाउका नाम ।।—उडुपम्, प्लवः, कोलः, ३ सानू डुङ्गाका ।।—स्वतो यदम्बुसरणं जलगमनं तत् स्रोतः १ पानीको प्राकृतिक उत्पत्तिस्थानबाट वहावको नाम ।। आतरः, तरपण्यम्, २ खेवा (नदीतारेको) बनी ।।—काष्ठाम्बुवाहिनी काष्ठमयी जलवाहिनी सा द्रोणी १ पानी राखने काठका डूँङ्को नाम ।। सांयात्रिकः,

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नियामकाः पोतवाहाः कूपको गुणवृक्षकः ४९१
नौकादण्डः क्षेपणी स्यादरित्रं केनिपातकः ४९२
अभ्रिः स्त्री काष्ठकुद्दालः सेकपात्रं तु सेचनम् ४९३
क्लीबेऽर्धनावं नावोऽर्धेऽतीतनौकेऽतिनु त्रिषु ४९४
त्रिष्वागाधात्प्रसन्नोऽच्छः कलुषोऽनच्छ आविलः ४९५
निम्नं गभीरं गम्भीरमुत्तानं तद्विपर्यये ४९६
अगाधमतलस्पर्शे कैवर्ते दाशधीवरौ ४९७
आनायः पुंसि जालं स्याच्छणसूत्रं पवित्रकम् ४९८

पोतवणिक् २ नाँव या जहाजको व्यापारीका नाम ॥—कर्णधारः, नाविकः, २ पोतवारले खीयाउने माँझीका नाम ॥—नियामकाः, पोतवाहाः २ मगरआदि दुष्ट जन्तुबाट बचाउनलाई जहाजका उच्च भागमा बस्ने कप्तानका नाम ॥—कूपकः, गुणवृक्षकः, २ गुनधरा वर्दमान टाङ्नलाई नाउका माझमा ठड्यायेका काठका नाम ॥—नौकादण्डः, क्षेपणी :२ बहना डाँडाका नाम ॥—अरित्रम्, केनिपातकः २ पतवारीका नाम ॥—अभ्रिः, काष्ठकुद्दालः २ नाउको काई खुरकने काठका कोदालाका नाम ॥—सेकपात्रम्, सेचनम्, २ पानी फ्याकने छालाका थैला या (कठौती) का नाम ॥ नावोऽर्धे अर्धनावम् १ नाउँका आधा हिस्साको नाम ॥—अतीतनौके नौकामतीत्य वर्तमाने मनुष्यादौ अतिनु १ नाउचढेर पारी पुगीसकेका मानिसको नाम । त्रिलिङ्गमा छ ॥ अतः परं आगाधात् 'अगाध' शब्दमभिव्याप्य त्रिषु वाच्यलिङ्गाः । याहाँ देखी अगाधसम्मका शब्द त्रिलिङ्गमा छन् ॥—प्रसन्नः, अच्छः, २ निर्मलका ॥—कलुषः, अनच्छः, आविलः ३ धमिलाका नाम ॥—निम्नम्, गभीरम्, गम्भीरम्, ३ गहिराका नाम ॥—तद्विपर्यये गम्भीरादितरस्मिन् उत्तानं १ नगहिराका नाम ॥ अगाधम्, अतलस्पर्शम्, २ अत्यन्त गहिराका नाम ॥—कैवर्तः, दाशः, धीवरः, ३ माझिका नाम ॥ आनायः, जालम्, २ जालका नाम ॥—शणसूत्रम्, पवित्रकम्, २ सनपाठका डोरीले

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मत्स्याधानी कुवेणी स्याद्बडिशं मत्स्यवेधनम् ४९९
पृथुरोमा झषो मत्स्यो मीनो वैसारिणोऽण्डजः ५००
विसारः शकुली चाथ गडकः शकुलार्भकः ५०१
सहस्रदंष्ट्रः पाठीन उलूपी शिशुकः समौ ५०२
नलमीनश्चिलिचिमः प्रोष्ठी तु शफरी द्वयोः ५०३
क्षुद्राण्डमत्स्यसंघातः पोताधानमथो झषाः ५०४
रोहितो मद्गुरः शालो राजीवः शकुलस्तिमिः ५०५
तिमिंगिलादयश्चाथ यादांसि जलजन्तवः ५०६
तद्भेदाः शिशुमारोद्रशङ्कवो मकरादयः ५०७

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ऋजीषं पिष्टपचनं कंसोऽस्त्री पानभाजनम् १७७१
कुतूः कृत्तेः स्नेहपात्रं सैवाल्पा कुतुपः पुमान् १७७२
सर्वमावपनं भाण्डं पात्रामत्रं च भाजनम् १७७३
दर्विः कम्बिः खजाका च स्यात्तर्दूर्दारुहस्तकः १७७४
अस्त्री शाकं हरितकं शिग्रुरस्य तु नाडिका १७७५
कलम्बश्च कडम्बश्च वेसवार उपस्करः १७७६
तिन्तिडीकं च चुक्रं च वृक्षाम्लमथ वेल्लजम् १७७७
मरीचं कोलकं कृष्णमूषणं धर्मपत्तनम् १७७८
जीरको जरणोऽजाजी कणा कृष्णे तु जीरके १७७९

कसौडीका नाम ।।—कलशः, घटः, कुटः, निपः, ४ गाग्राका नाम ।। घटः स्त्री. पुं.माछ ।।—शरावः, वर्धमानकः, २ कहताराका नाम ।। शरावः पुं.नपुंसकमाछ ।।—ऋजीषम्, पिष्टपचनम्, २ तावाका नाम ।।—कंसः, पानभाजनम्, २ आँखोरा गिलास आदिका नाम ।।—कृत्तेः स्नेहपात्रे कुतूः १ तेल घिउ हाल्ने छालाका भाँडा (सिरिया कुप्पा) आदिको नाम ।। सैव कुतूरल्पा चेत् कुतुपः १ सानु सिरिया कुप्पाका नाम ।। सर्वे पात्रमात्रमावपनं १ सामान्य वर्तनमात्रको नाम ।।—आवपनम्, भाण्डम्, पात्रम्, अमत्रम्, ५ भाँडावर्तनका नाम ।।—दर्विः, कम्बिः, खजाका, ३ डाडूका नाम ।।—तर्दूः, दारुहस्तकः, २ पन्युका नाम ।।—शाकम्, हरितकम्, शिग्रुः, ३ सागका नाम ।। कलम्बः, कडम्बः, २ सागका डाँठका नाम ।।—वेसवारः, उपस्करः, २ वेसार-हिङ्-अदुवा-मरीच-जीरो-हलेदो धनियाँ ई छ चीज क्रमैले पहिला पहिलाको दोवर २ मिलायेर बनायेका मसालाका नाम ।।—तिन्तिडीकम्, चुक्रम्, वृक्षाम्लम्, ३ चूक अमिला तथा तित्राका अमिलाका नाम ।।—वेल्लजम्, मरीचम्, कोलकम्, कृष्णम्, ऊषणम्, धर्मपत्तनम्, ६ मरीचका नाम ।।—जीरकः, जरणः, अजाजी,

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सुषवी कारवी पृथ्वी पृथुः कालोपकुञ्चिका १७८०
आर्द्रकं शृङ्गवेरं स्यादथ छत्रा वितुन्नकम् १७८१
कुस्तुम्बुरु च धान्याकमथ शुण्ठी महौषधम् १७८२
स्त्रीनपुंसकयोर्विश्वं नागरं विश्वभेषजम् १७८३
आरनालकसौवीरकुल्माषाभिषुतानि च १७८४
अवन्तिसोमधान्याम्लकुञ्जलानि च काञ्जिके १७८५
सहस्रवेधि जतुकं वाह्लीकं हिङ्गु रामठम् १७८६
तत्पत्री कारवी पृथ्वी वाष्पिका कबरी पृथुः १७८७
निशाख्या काञ्चनी पीता हरिद्रा वरवर्णिनी १७८८
सामुद्रं यत्तु लवणमक्षीवं वशिरं च तत् १७८९
सैन्धवोऽस्त्री शीतशिवं मणिमन्थं च सिन्धुजे १७९०
रौमकं वसुकं पाक्यं बिडं च कृतके द्वयम् १७९१

कणा, ४ जीराका नाम ।।—सुषवी, कारवी, पृथ्वी, पृथुः, काला, उपकुञ्चिका, ६ काला जीराका नाम ।। आर्द्रकम्, शृङ्गवेरम्, २ अदुवाका नाम ।।—छत्रा, वितुन्नकम्, कुस्तुम्बुरु, धान्याकम्, ४ धनियाँका नाम ।।—शुण्ठी, महौषधम्, विश्वम्, नागरम्, विश्वभेषजम्, ५ सुठाका नाम ।। स्त्री-नपुंसकमा छ ।।—आरनालकम्, सौवीरम्, कुल्माषाभिषुतम्, अवन्तिसोमम्, धान्याम्लम्, कुञ्जलम्, काञ्जिकम्, ७ पानीमा अनेक औषधी हालेर कुहायेका औषधी विशेषका नाम ।।—सहस्रवेधि, जतुकम्, बाह्लीकम्, हिङ्गु, रामठम्, ५ हिङ्का नाम ।।—कारवी, पृथ्वी, बाष्पिका, कबरी, पृथुः, ५ हिङ्का वृक्षका पातका नाम ।।—निशा, काञ्चनी, पीता, हरिद्रा, वरवर्णिनी, ५ हलेदाका बेसारका (हर्दिका) नाम ।।—यत्सामुद्रं लवणं अक्षीवम्, वशिरम्, २ समुद्रनूनका नाम ।।—सैन्धवः, शीतशिवम्, मणिमन्थम्, सिन्धुजम्, ४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सौवर्चलेऽक्षरुचके तिलकं तत्र मेचके १७९२
मत्स्यण्डी फाणितं खण्डविकारः शर्करा सिता १७९३
कूर्चिका क्षीरविकृतिः स्याद्रसाला तु मार्जिता १७९४
स्यात्तेमनं तु निष्ठानं त्रिलिङ्गा वासितावधेः १७९५
शूलाकृतं भटित्रं स्याच्छूल्यमुख्यं तु पैठरम् १७९६
प्रणीतमुपसंपन्नं प्रयस्तं स्यात्सुसंस्कृतम् १७९७
स्यात्पिच्छिलं तु विजिलं संमृष्टं शोधितं समे १७९८
चिक्कणं मसृणं स्निग्धं तुल्ये भावितवासिते १७९९
आपक्वं पौलिरभ्यूषो लाजाः पुंभूम्नि चाक्षताः १८००

सिंधेनूनका नाम ॥—रौमकम्, वसुकम्, २ साँभरी नूनका नाम ॥—पाक्यम्, बिडम्, २ खारानूनका नाम ॥—सौवर्चलः, अक्षम्, रुचकम्, ३ सौवर्चल (सौंचर) नूनका नाम ॥ सौवर्चले मेचके तिलकं १ बिरेनूनको नाम ॥—मत्स्यण्डी, फाणितम्, २ खुदाका नाम ॥—खण्डविकारः, शर्करा, सिता, ३ चिनिका नाम ॥—क्षीरस्य विकृतिः कूर्चिका १ कुराउनीका नाम ॥—रसाला, मार्जिता, २ सिखर्नीका नाम ॥—तेमनम्, निष्ठानम्, २ तिउन तर्कारीका नाम ॥ यहाँदेखी वासितसम्मका शब्द त्रिलिङ्गी छन् ॥—शूलाकृतम्, भटित्रम्, शूल्यम्, ३ सुकुटीमासुका नाम ॥—उख्यम्, पैठरम्, २ कसौडी प्रभृतिमा पकायेका अन्नादि वस्तुका नाम ॥—प्रणीतम्, उपसंपन्नम्, २ पाकेका वस्तुका नाम ॥—प्रयस्तम्, सुसंस्कृतम्, २ मसला हालेर राम्रो तवरले तयार गरेका वस्तुका नाम ॥—पिच्छिलम्, विजिलम्, २ झोल पारेका वस्तुका नाम ॥—संमृष्टम्, शोधितम्, २ धोई-केलाई-निफनी साफ पारेका वस्तुका नाम ॥—चिक्कणम्, मसृणम्, स्निग्धम्, ३ मसीना चिप्ला वस्तुका नाम ॥—भावितम्, वासितम्, २ वास्ना आउने गरी सुगन्धित गरी बनायेका वस्तुका नाम ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पृथुकः स्याच्चिपिटको धाना भृष्टयवे स्त्रियः १८०१
पूपोऽपूपः पिष्टकः स्यात् करम्भो दधिसक्तवः १८०२
भिःसा स्त्री भक्तमन्धोऽन्नमोदनोऽस्त्री स दीदिविः १८०३
भिःसटा दग्धिका सर्वरसाग्रे मण्डमस्त्रियाम् १८०४
मासराचामनिस्रावा मण्डे भक्तसमुद्भवे १८०५
यवागूरुष्णिका श्राणा विलेपी तरला च सा १८०६
'म्रक्षणाभ्यञ्जने तैलं कृसरस्तु तिलौदनः' ❀❀
गव्यं त्रिषु गवां सर्वं गोविट् गोमयमस्त्रियाम् १८०७
तत्तु शुष्कं करीषोऽस्त्री दुग्धं क्षीरं पयः समम् १८०८

जस्तै धूपेन भाविताास्तिलाः ॥—आपक्वम्, पौलि, अध्यूषः, ३ भुटेका पिल्स्यायेका हरिया मकै जौ चना आदि अन्नका नाम ॥—लाजाः १ लावाको नाम बहुवचनान्त पुंलिङ्गछ ॥ अक्षताः १ अक्षेताको नाम यो पनि बहुवचनान्तः पुंलिङ्गछ ॥—पृथुकः, चिपिटकः, २ चिउराका नाम ॥ धानाः १ भुटेका जौको नाम नित्यं बहुवचनान्त त्रिलिङ्गीछ ॥ —पूपः, अपूपः, पिष्टकः, ३ पुवा-मालपुवा सेल अनर्सा आदिका नाम ॥ दधियुक्ताः सक्तवः करम्भः १ दहिसातुको नाम ॥—भिःसा, भक्तम्, अन्धः, अन्नम्, ओदनः, दीदिविः, ६ भातका नाम ॥ अन्धः सान्तछ ओदनः पुं. नपुं.माछ ॥ दीदिविः, पुंलिङ्गछ ॥—भिःसटा, दग्धिका, २ डढेका अन्नका (माम्री)का नाम ॥—सर्वेषां रसानामग्रं अग्रिमो द्रवो मण्डः १ साधारण माडको नाम पुं. नपुं.माछ ॥—मासरः, आचामः, निस्रावः, ३ भातका माडका नाम ॥—यवागूः, उष्णिका, श्राणा, विलेपी, तरला, ५ फाँडो (हलुवा)का नाम ॥ म्रक्षणः, अभ्यञ्जनः, तैलः, ३ तेलका नाम ॥—कृसरः, तिलौदनः, २ खिचडीका नाम ॥—गवां सर्वं गव्यं १ गाईका गोबर आदि ५ वस्तुको नाम ॥—गोविट्, गोमयम्, २ गोबरका नाम ॥ गोमयं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पयस्यमाज्यदध्यादि द्रप्सं दधि घनेतरत् १८०९
घृतमाज्यं हविः सर्पिर्नवनीतं नवोद्धृतम् १८१०
तत्तु हैयंगवीनं यद्ध्योगोदोहोद्भवं घृतम् १८११
दण्डाहतं कालशेयमरिष्टमपि गोरसः १८१२
तक्रं ह्युदश्विन्मथितं पादाम्ब्वर्धाम्बु निर्जलम् १८१३
मण्डं दधिभवं मस्तु पीयूषोऽभिनवं पयः १८१४
अशनाया बुभुक्षा क्षुद्ग्रासस्तु कवलः पुमान् १८१५
सपीतिः स्त्री तुल्यपानं सग्धिः स्त्री सहभोजनम् १८१६
उदन्या तु पिपासा तृट् तर्षो जग्धिस्तु भोजनम् १८१७

पुं. नपुं.मा छ ।। शुष्कं, करीषम् २ गुइँठाका नाम ।।—दुग्धम्, क्षीरम्, पयः, ३ दूधका नाम । पयस्यम् १ दूधबाट वनेका पदार्थको नाम । यद्घनादितरत् दधि द्रप्सं १ नजमेको पँद्यालो दहिको नाम । घृतम्, आज्यम्, हविः, सर्पिः, ४ घिउका नाम ।।—नवनीतम्, नवोद्धृतम्, २ नउनी घिउका नाम । ह्योगोदोहोद्भवं घृतं हैयङ्गवीनं १ एकरातेदहिका नउनीघिउँको नाम ।।—दण्डाहतम्, कालशेयम्, अरिष्टम्, गोरसः, ४ मही (मोही)का नाम । तक्रं १ तक्र चौथाई १ सेरदहिमा १ पाउ पानी हालेर मथेका महीको नाम । अर्धाम्बु उदश्वित् १ दहिको आधाभाग पानी मिलायेर मथेका महीको नाम । मथितम् । पानी नहाली मथेका दहिको नाम । दधिभवं मस्तु १ दहिवाट निस्केका पानीको नाम । अभिनवं पयः पीयूषः १ भर्खर दुहेका ताजा दूधको नाम ।।—अशनाया, बुभुक्षा, क्षुत्, ३ भोकका नाम । क्षुत् स्त्री लिङ्ग धकारान्तः छ । ग्रासः, कवलः, २ गाँसका नाम ।।—सपीतिः, तुल्यपानम्, २ धेरै जना मिलेर सँगैं पिउनाका नाम ।। सग्धिः, सहभोजनम्, २ धेरै जना मिलेर एक साथ खानाका का नाम ।।—उदन्या, पिपासा, तृट्, तर्षः, ४ प्यास (तिर्खाका) नाम ।।—

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

जेमनं लेह आहारो निघसो न्याद इत्यपि १८१८
सौहित्यं तर्पणं तृप्तिः फेला भुक्तसमुज्झितम् १८१९
कामं प्रकामं पर्याप्तं निकामेष्टं यथेप्सितम् १८२०
गोपे गोपालगोसंख्यगोधुगाभीरवल्लवाः १८२१
गोमहिष्यादिकं पादबन्धनं द्वौ गवीश्वरे १८२२
गोमान् गोमी गोकुलं गोधनं स्याद्गवां व्रजे १८२३
त्रिष्वाशितंगवीनं तद्गावो यत्राशिताः पुरा १८२४
उक्षा भद्रो बलीवर्द ऋषभो वृषभो वृषः १८२५
अनड्वान् सौरभेयो गौरुक्ष्णां संहतिरौक्षकम् १८२६
गव्या गोत्रा गवां वत्सधेन्वोर्वात्सकधैनुके १८२७

जग्धिः, भोजनम्, जेमनं, लेहः, आहारः, निघसः, न्यादः, ७ भोजन (खानु) का नाम ॥—सौहित्यम्, तर्पणम्, तृप्तिः, ३ तृप्तिका (अघाउनाका) नाम। फेला १ खायेर छोडेका पुराको नाम ॥—कामम्, प्रकामम्, पर्याप्तम्, निकामम्, इष्टम्, यथेप्सितम्, ६ ईच्छानुसारका नाम ॥—गोपः, गोपालः, गोसंख्यः, गोधुक्, आभीरः, बल्लवः, ६ ग्वाला (अहिरका) नाम ॥—गोमहिष्यादिकं पादबन्धनं २ खुट्टामा बाँध्नु पर्ने गाई भैंसी आदि पशुका नाम ॥—गोमान्, गोमी, २ गाईक [illegible]यनीका नाम ॥—गोकुलम्, गोधनम् २ गाईका बथानका नाम। यत्र पुरा गाव आशिता भोजिताः तत्स्थानं आशितंगवीनम् १ अघिगाईलाई खुवाउने चराउने गरेका ठाउको नाम तीनलिङ्गमाछ ॥—उक्षा, भद्रः, बलीवर्दः, ऋषभः, वृषभः, वृषः, अनड्वान्, सौरभेयः, गौः, ९ गोरूका नाम। उक्ष्णां संहतिः, औक्षकं १ गोरुका बथानको नाम। गवां संहतिः समूहो गव्या, गोत्रा, २ गाईका बथानका नाम। वत्सानां संहतिर्वात्सकम् १ बाछाका बथानको नाम। धेनूनां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वृषो महान् महोक्षः स्याद्वृद्धोक्षस्तु जरद्गवः १८२८
उत्पन्न उक्षा जातोक्षः सद्योजातस्तु तर्णकः १८२९
शकृत्करिस्तु वत्सः स्याद्दम्यवत्सतरौ समौ १८३०
आर्षभ्यः षण्डतायोग्यः षण्डो गोपतिरिट्चरः १८३१
स्कन्धदेशे त्वस्य वहः सास्ना तु गलकम्बलः १८३२
स्यान्नस्तितस्तु तस्योतः प्रष्ठवाड् युगपार्श्वगः १८३३
युगादीनां तु वोढारो युग्यप्रासङ्ग्यशाकटाः १८३४
खनति तेन तद्वोढाऽस्येदं हालिकसैरिकौ १८३५
धूर्वहे धुर्यधौरेयधुरीणाः सधुरंधराः १८३६
उभावेकधुरीणैकधुरावेकधुरावहे १८३७

संहतिर्धैनुकम् १ गाईका बथानको नाम । महान्वृषो महोक्षः, १ ठूला गोरूको नाम ॥—वृद्धोक्षः, जरद्गवः २ बूढा गोरूका नाम ॥—उत्पन्नः उक्षा जातोक्षः १ दायेका बहरको नाम । सद्योजातस्तर्णकः १ जन्मने निविक्ति कैका कलिला बाछाको नाम ॥—शकृत्करिः, वत्सः, २ साधारण बाछाका नाम ॥—दम्यः, वत्सतरः, २ बहरका नाम । षण्डता गोपतित्वं तद्योग्य आर्षभ्यः १ साँढ बनाउने (सज्ने) बेला भयेका बहरको नाम ॥—षण्डः गोपतिः, इट्चरः ३ साँढका नाम । अस्य स्कन्धदेशे वहः १ गोरूका काँधको नाम ॥—सास्ना, गलकम्बलः, २ गाई गोरूका गलकम्बल (माला)का नाम ॥—नस्तितः, नस्योतः, २ नाक छेडेर डोरी लायेका पशुका नाम ॥-प्रष्ठवाट्, युगपार्श्वगः, २ दाउनलागेका गोरूका नाम ॥ युगस्य वोढा युग्यः, प्रासङ्ग्यः, शाकटः, ३ युग्यः १ जोतने गरेका गोरुको नाम । प्रासङ्ग्यः, १ दाँउदा काँधमा राख्ने काठ बोक्ने गोरुको नाम । शाकटः, १ गाडा तान्नेगोरूको नाम ॥ तेन खनतीत्याद्यर्थे हालिकः, सैरिकः, २ हलाले जोतने, हलोबोक्ने, हलो संबन्धि वस्तु ई ३ का नाम ॥—धूर्वहः, धुर्यः, धौरेयः, धुरीणः, धुरंधरः,

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स तु सर्वधुरीणः स्याद्यो वै सर्वधुरावहः १८३८
माहेयी सौरभेयी गौरुस्रा माता च शृङ्गिणी १८३९
अर्जुन्यघ्न्या रोहिणी स्यादुत्तमा गोषु नैचिकी १८४०
वर्णादिभेदात्संज्ञाः स्युः शबलीधवलादयः १८४१
द्विहायनी द्विवर्षा गौरेकाब्दा त्वेकहायनी १८४२
चतुरब्दा चतुर्हायण्येवं त्र्यब्दा त्रिहायणी १८४३
वशा वन्ध्याऽवतोका तु स्रवद्गर्भाथ संधिनी १८४४
आक्रान्ता वृषभेणाथ वेहद्गर्भोपघातिनी १८४५
काल्योपसर्या प्रजने प्रष्ठौही बालगर्भिणी १८४६
स्यादचण्डी तु सुकरा बहुसूतिः परेष्टुका १८४७

---

५ भारी बोक्ने गोरूका नाम ॥—एकधुरीणः, एकधुरः, एकधुरावहः ३ यौटै किसिमको भारी बोक्ने अनेक गोरुका नाम ॥ सर्वधुरीणः १ सबै थोकको जम्मैभारी बोक्ने गोरुका नाम ॥—माहेयी, सौरभेयी, गौः, उस्रा, माता, शृङ्गिणी, अर्जुनी, अघ्न्या, रोहिणी, ९ गाईका नाम ॥ नैचिकी १ असली गाईको नाम ॥ शबली, १ टाटेपाटे गाईको नाम ॥ धवला, १ सेती गाईको नाम तेस्तै काली-कैली-शेती गाईलाई भन्दामा कृष्णा-कपिला पाटला इत्यादि जान्नु ॥ द्विहायनी, १ दुई वर्षकी गाईको नाम ॥ एकहायनी, १ एक वर्षकी गाईको नाम ॥ चतुर्हायणी, १ चार वर्षकी गाईको नाम ॥ त्रिहायणी, १ तीन वर्षकी गाईको नाम ॥—वशा, वन्ध्या, २ (थारी) बाझीगाईका नाम ॥—अवतोका, स्रवद्गर्भा, २ दुहुनी गाईका नाम ॥ संधिनी १ साहभयेकी (साँढेलागेकी) गाइको नाम ॥ विहन्ति गर्भं वृषोपगमनाद्गर्भोपघातिनी वेहद् , वृषोपगा, २ बार बार साँढे खोजेर गर्भ रहन नदिने गाईको नाम ॥ प्रजने काल्या, गौरुपसर्या २ कंलाउने बेलाकी गाईको नाम ॥ बालगर्भिणी प्रष्ठौही २ पहिलावेतकंलायेकी गाईका नाम ॥—

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

चिरप्रसूता बष्कयणी धेनुः स्यान्नवसूतिका १८४८
सुव्रता सुखसंदोह्या पीनोध्नी पीवरस्तनी १८४९
द्रोणक्षीरा द्रोणदुग्धा धेनुष्या बन्धके स्थिता १८५०
समांसमीना सा यैव प्रतिवर्षं प्रसूयते १८५१
ऊधस्तु क्लीबमापीनं समौ शिवककीलकौ १८५२
न पुंसि दाम संदानं पशुरज्जुस्तु दामनी १८५३
वैशाखमन्थमन्थानमन्थानो मन्थदण्डके १८५४
कुठरो दण्डविष्कम्भो मन्थनी गर्गरी समे १८५५
उष्ट्रे क्रमेलकमयमहाङ्गाः करभः शिशुः १८५६
करभाः स्युः शृङ्खलका दारवैः पादबन्धनैः १८५७

अचण्डी, सुकरा, २ साधु गाईका नाम ।।—बहुसूतिः, परेष्टुका, २ धेरै वेतव्यायेकी गाईका नाम ।।—चिरप्रसूता, बष्कयणी, २ बकेर्ना गाईका नाम ।। धेनुः, नवसूतिका, २ लैनी गाईका नाम ।।-सुव्रता, सुखसंदोह्या, २ सजीलैसित दुहिने (कमली) गाईका नाम ।।—पीनोध्नी, पीवरस्तनी, २ ठूलो कचौडो (स्तन) हुने गाईका नाम ।।-द्रोणक्षीरा, द्रोणदुग्धा, २ आयुर्वेदिक तौलबाट १६ सेर दूध दिने गाईका नाम ।। बन्धकं आधिः, तत्र स्थिता सा धेनुष्या १ बँधुई गाईका नाम ।। समांसमीना १ वर्षेनी व्याउने गाईको नाम ।।—ऊधः, आपीनम्, २ कचौंडाका नाम ।। ऊधः नपुं.मात्र ।।—शिवकः, कीलकः, २ किलाका नाम ।।—दाम, संदानम्, २ दाम्लाका नाम ।।—दाम स्त्री·पुंमात्र ।।—पशुरज्जुः, दामनी, २ छाँदहाल्ने, खुट्टा बाँधने डोरी र धेरै पशु बाँध्ने दाँही प्रभृतिका दाम्लाका नाम ।।—वैशाखः, मन्थः, मन्थानः, मन्था, मन्थदण्डकः, ५ मधानीका नाम ।।—कुठरः, दण्डविष्कम्भः, २ मधानी अड्याउन नेती बाँधने थामका नाम ।।—मन्थनी, गर्गरी, २ ठेकीका नाम ।।—उष्ट्रः, क्रमेलकः, मयः, महाङ्गः, ४ ऊँटका नाम ।।—

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अजा छागी शुभच्छागबस्तच्छगलका अजे १८५८
मेढ्रोरभ्रोरणोर्णायुमेषवृष्णय एडके १८५९
उष्ट्रोरभ्राणवृन्दे स्यादौष्ट्रकौरभ्रकाजकम् १८६०
चक्रीवन्तस्तु बालेया रासभा गर्दभाः खराः १८६१
वैदेहकः सार्थवाहो नैगमो वाणिजो वणिक् १८६२
पण्याजीवो ह्यापणिकः क्रयविक्रयिकश्च सः १८६३
विक्रेता स्याद्विक्रयिकः क्रायिकक्रयिकौ समौ १८६४
वाणिज्यं तु वणिज्या स्यान्मूल्यं वस्नोऽप्यवक्रयः १८६५
नीवी परिपणो मूलधनं लाभोऽधिकं फलम् १८६६
परिदानं परीवर्तो नैमेयनिमयावपि १८६७
पुमानुपनिधिर्न्यासः प्रतिदानं तदर्पणम् १८६८

उष्ट्रस्य शिशुः करभः १ ऊँटका बच्चाका नाम ।। शृङ्खलकाः १ ठिंगुराले बाँधेका ऊँटको नाम ।।—अजा, छागी, २ बाखीका नाम ।।—शुभः, छागः, बस्तः, छगलकः, अजः,५ बाख्रा (बोकाका) नाम ।। मेढ्रः, उरभ्रः, उरणः, ऊर्णायुः, मेषः, वृष्णिः, एडकः, ७ भेडाका नाम । औष्ट्रकम् १ ऊँटका वथानको नाम । औरभ्रकम् १ भेडाका वथाको नाम । आजकम् १ बाख्राका बथानको नाम ।।—चक्रीवान्, बालेयः, रासभः, गर्दभः, खरः, ५ गदाहाका नाम ।।—वैदेहकः, सार्थवाहः, नैगमः, वाणिजः, वणिक्, पण्याजीवः, आपणिकः क्रयविक्रयिकः, ८ बेपारीका नाम ।।—विक्रेता, विक्रयिकः, २ बेच्नेका नाम ।।—क्रायिकः, क्रयिकः, २ किन्नेका नाम ।।—वाणिज्यम्, वणिज्या' २ वेपारका नाम ।।—मूल्यम्, वस्नः, अवक्रयः, ३ मोलका नाम ।।—नीवी, परिपणः, मूलधनम्, ३ किन्दा परेका साँऊ (डोको) का नाम । मूलधनादधिकं फलं लाभः १ नाफाको नाम ।।—परिदानम्, परीवर्तः, नैमेयः,

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

क्रये प्रसारितं क्रय्यं क्रेयं क्रेतव्यमात्रके १८६९
विक्रेयं पणितव्यं च पण्यं क्रय्यादयस्त्रिषु १८७०
क्लीबे सत्यापनं सत्यंकारः सत्याकृतिः स्त्रियाम् १८७१
विपणो विक्रयः संख्याः संख्येये ह्यादश त्रिषु १८७२
विंशत्याद्याः सदैकत्वे सर्वाः संख्येयसंख्ययोः १८७३
संख्यार्थे द्विबहुत्वे स्तस्तासु चानवतेः स्त्रियः १८७४
पङ्क्तेः शतसहस्रादि क्रमाद्दशगुणोत्तरम् १८७५

निमयः, ४ साट्नाका नाम ॥—उपनिधिः, न्यासः, २ नासोका नाम। उपनिधिः, पुं. माछ। प्रतिदानं १ नासो बुझाउनु फिर्तादिनुको नाम। क्रय्यं १ बेच्न राखेकावस्तुको नाम। क्रेयम् १ किन्न लायक भयेका वस्तुको नाम ॥—विक्रेयम्, पणितव्यम्, पण्यम्, ३ बेच्न लायक (बेच्ने) चिज विजका नाम। त्रिलिङ्गीछन् ॥—सत्यापनम्, सत्यंकारः, सत्याकृतिः, ३ बैनाका नाम ॥—विपणः, विक्रयः, २ बिक्रिका नाम। संख्या वाचक (एक द्वि प्रभृति) शब्द संख्येय (गनिने) वस्तुलाई कहँदा, दशशब्द-को प्रयोग हुन् ज्याल अर्थात् (उन्नाइस) सम्म विशेष्यनिघ्न त्रिलिङ्गी हुन्छन् ॥ अव विंशति देखी आरम्भ गरेका (एकोनविंशति-विंशति लगायत) नवनवति (उनान्सये सम्मकाशब्द निर्दिष्ट संख्यार संख्येय (गनिने) लाईकहँदा एक वचनान्तै रहन्छन्, तर संख्या वाचक छँदा स्त्रीलिङ्ग, संख्येयवाचक छँदा विशेष्यनिघ्न लिङ्गीहुन्छन्। इनैशब्द संख्याको द्वित्व बहुत्व जस्तै २ वीस ३ वीस इत्यादिलाई बुझाँउँदाता द्विवचनान्त बहुवचनान्त पनि हुन्छन् ॥ पङ्क्तिर्दशसंख्या, शतम् सहस्रम्, इत्यादि पङ्क्ति (दश) देखी शुरू भयेका शत-सहस्र-प्रभृति परार्द्ध पर्यन्तका संख्या उत्तरोत्तर १०।१० गुणा बढता हुन्छन् तिन्को नाम र स्वरूप हेर आर्कापढिछ। एकैकवृद्धिः सनामाङ्कग्राहं ज्ञेया ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यौतवं द्रुवयं पाय्यमिति मानार्थकं त्रयम् १८७६
मानं तुलाङ्गुलिप्रस्थैर्गुञ्जाः पञ्चाद्यमाषकः १८७७
ते षोडशाक्षः कर्षोऽस्त्री पलं कर्षचतुष्टयम् १८७८
सुवर्णबिस्तौ हेम्नोऽक्षे कुरुबिस्तस्तु तत्पले १८७९
तुला स्त्रियां पलशतं भारः स्याद्विंशतिस्तुलाः १८८०
आचितो दश भाराः स्युः शाकटो भार आचितः १८८१
कार्षापणः कार्षिकः स्यात् कार्षिके ताम्रिके पणः १८८१
अस्त्रियामाढकद्रोणौ खारी वाहो निकुञ्चकः १८८३

एकम्	१	वृन्दम्	१०००००००००
दशः	१०	खर्वः	१००००००००००
शतम्	१००	निखर्वः	१०००००००००००
सहस्रम्	१०००	शङ्खः	१००००००००००००
अयुतम्	१००००	पद्मः	१०००००००००००००
लक्षम्	१०००००	सागरः	१००००००००००००००
नियुतम्	१००००००	अन्त्यम्	१०००००००००००००००
कोटि	१०००००००	मध्यम्	१००००००००००००००००
अर्बुदम्	१००००००००	परार्द्धम्	१०००००००००००००००००

यौतवम्, द्रुवयम्, पाय्यम्, ३ प्रमाण नाप्नु-जोख्नुभर्नु ई ३ का ३ नाम ॥ पञ्चगुञ्जाः आद्यमाषकः २ पाँचगुञ्जा ५ लाल एक मासाको नाम । अक्षः, कर्षः, २ । १६ मासाका नाम । पलं १ चार कर्षको नाम ॥—सुवर्णः, बिस्तः, २ सोह्र मासा सुवर्णका नाम । कुरुबिस्तः १ एक पल ५ तोला ४ मासा सुवर्णको नाम । तुला १ शय १०० पल अर्थात् ५३३ तोला ४ मासाको नाम । भारः १ बीसतुला अर्थात् १०६६६ तोला र ८ मासाको नाम । आचितः (दशभार) अर्थात् १०६६६६ तोला र

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कुडवः प्रस्थ इत्याद्याः परिमाणार्थकाः पृथक् १८८४
पादस्तुरीयो भागः स्यादंशभागौ तु वण्टके १८८५
द्रव्यं वित्तं स्वापतेयं रिक्थमृक्थं धनं वसु १८८६
हिरण्यं द्रविणं द्युम्नमर्थरैविभवा अपि १८८७
स्यात्कोशश्च हिरण्यं च हेमरूप्ये कृताकृते १८८८
ताभ्यां यदन्यत्तत्कुप्यं रूप्यं तद्द्वयमाहतम् १८८९
गारुत्मतं मरकतमश्मगर्भो हरिन्मणिः १८९०
शोणरत्नं लोहितकः पद्मरागोऽथ मौक्तिकम् १८९१
मुक्ताथ विद्रुमः पुंसि प्रवालं पुंनपुंसकम् १८९२
रत्नं मणिर्द्वयोरश्मजातौ मुक्तादिकेऽपि च १८९३

---

८ मासाको नाम। यः शाकटः सोऽ्याचित ॥ मानिसले बोक्न नसकिने गाड़ीमा लादनु पर्ने भारीको पनि नाम हो। कार्षापणः, कार्षिकः२ चादिका रूपियाका नाम। ताम्रिके तस्मिन्कार्षिके पण १ तावाका पैसाको नाम॥ आढकः, द्रोणः, खारी, वाहः, निकुञ्चकः, कुडवः, प्रस्थः, ७आढकः,४ पाथीको द्रोणः, १६ पाथीको एकखारी (सोह्रद्रोणः), १२ मुरी १६ पाथीको-वाहः, वीसखारी २४६ मुरीको निकुञ्चकः,आधामानाको कुडवः, कुरुवाको प्रस्थः, १ पाथीको ७ का ७ नाम क्रमैले जान्नु॥ तुर्यो भागः पादः १ चौथाईको नाम ॥—अंशः, भागः, वण्टकः, ३ भागः, (अंशका) नाम। द्रव्यम्, वित्तम्, स्वापतेयम् रिक्थम्, ऋक्थम्, धनम्, वसु, हिरण्यम्, द्रविणम्, द्युम्नम्, अर्थः, राः, विभवः, १३ धनका नाम॥—कोशः, हिरण्यम्, २ केही (भूषण प्रभृति) बनायेका र नबनायेका (कोरा) सुन् चाँदीका नाम॥ कुप्यं १ सुन चादि बाहेक जिनिस मालको नाम॥ रूप्यम् १ छाप लायेका सुवर्ण चादिका (असर्फि रुपिया) को नाम॥—गारुत्मतम्, मरकतम्, अश्मगर्भः, हरिन्मणिः, ४ पन्नाका नाम॥—शोणरत्नम्, लोहितकः,

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्वर्णं सुवर्णं कनकं हिरण्यं हेम हाटकम् १८९४
तपनीयं शातकुम्भं गाङ्गेयं भर्म कर्बुरम् १८९५
चामीकरं जातरूपं महारजतकाञ्चने १८९६
रुक्मं कार्तस्वरं जाम्बूनदमष्टापदोऽस्त्रियाम् १८९७
अलंकारसुवर्णं यच्छृङ्गीकनकमित्यदः १८९८
दुर्वर्णं रजतं रूप्यं खर्जूरं श्वेतमित्यपि १८९९
रीतिः स्त्रियामारकूटो न स्त्रियामथ ताम्रकम् १९००
शुल्वं म्लेच्छमुखं द्व्यष्टवरिष्ठोदुम्बराणि च १९०१
लोहोऽस्त्री शस्त्रकं तीक्ष्णं पिण्डं कालायसायसी १९०२
अश्मसारोऽथ मण्डूरं सिंहाणमपि तन्मले १९०३
सर्वं च तैजसं लोहं विकारस्त्वयसः कुशी १९०४
क्षारः काचोऽथ चपलो रसः सूतश्च पारदे १९१५

पद्मरागः, ३ माणिकका नाम ॥—मौक्तिकम्, मुक्ता, २ मोतीका नाम ॥—विद्रुमः, प्रवालः, २ मुगाका नाम ॥—रत्नम्, मणिः, २ सामान्य रत्नका नाम ॥ मणिः स्त्री-पुंमाछ ॥—स्वर्णम्, सुवर्णम्, कनकम्, हिरण्यम्, हेम, हाटकम्, तपनीयम्, शातकुम्भम्, गाङ्गेयम्, भर्म, कर्बुरम्, चामीकरम्, जातरूपम्, महारजतम्, काञ्चनम्, रुक्मम्, कार्तस्वरम्, जाम्बूनदम्, अष्टापदम्, १९ सुवर्णः, (सुन)का नाम ॥ अष्टापदं पुं. नपुं.माछ ॥ शृङ्गीकनकम् १ गहना बनायेका सुवर्णको नाम ॥—दुर्वर्णम्, रजतम्, रूप्यम्, खर्जूरम्, श्वेतम्, ५ चाँदीका नाम ॥—रीतिः, आरकूटः, २ पित्तलका नाम ॥—ताम्रकम्, शुल्बम्, म्लेच्छमुखम्, द्व्यष्टम्, वरिष्टम्, उदुम्बरं, ६ तामा (ताम्र)का नाम ॥—लोहः, शस्त्रकम्, तीक्ष्णम्, पिण्डम्, कालायसम्, अयः, अश्मसारः, ७ फलामका नाम ॥—मण्डूरम, सिंहाणम्, २ लोहामा निस्कने कीटका नाम ॥ लोहम् १ सामान्य धातु(कासन्तामन्)का नाम ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

गवलं माहिषं श्रृङ्गमभ्रकं गिरिजामले १९०६
स्रोतोञ्जनं तु सौवीरं कापोताञ्जनयामुने १९०७
तुत्थाञ्जनं शिखिग्रीवं वितुन्नकमयूरके १९०८
कर्परी दार्विकाक्काथोद्भवं तुत्थं रसाञ्जनम् १९०९
रसगर्भं तार्क्ष्यशैलं गन्धाश्मनि तु गन्धिकः १९१०
सौगन्धिकश्च चक्षुष्याकुलाल्यौ तु कुलत्थिका १९११
रीतिपुष्पं पुष्पकेतु पुष्पकं कुसुमाञ्जनम् १९१२
पिञ्जरं पीतनं तालमालं च हरितालके १९१३
गैरेयमर्थ्यं गिरिजमश्मजं च शिलाजतु १९१४
बोलगन्धरसप्राणपिण्डगोपरसाः समाः १११५
डिण्डीरोऽब्धिकफः फेनः सिन्दूरं नागसंभवम् १९१६

अयसो विकारः कुशो १ फलामका फालीको नाम ॥—क्षारः, काचः, २ काँचका नाम ॥—चपलः, रसः, सूतः, पारदः, ४ पाराका नाम ॥—यन्माहिषं श्रृङ्गं तत् गवलं १ भैंसीका सिंगको नाम ॥—अभ्रकम्, गिरिजामलम्, २ अभ्रकका नाम ॥—स्रोतोञ्जनम्, सौवीरम्, कापोताञ्जनम्, यामुनम्, ४ सुर्माका नाम ॥—तुत्थाञ्जनम्, शिखिग्रीवम्, वितुन्नकम्, मयूरकम्, कर्परी, ५ तुत्थाञ्जन नेत्रको औषधी विशेषका नाम ॥—तुत्थम्, रसाञ्जनम्, रसगर्भम्, तार्क्ष्यशैलम्, ४ चुत्राका रसवाट बनेको औषधी विशेषका नाम ॥—गन्धाश्म, गन्धिकः, सौगन्धिकः, ३ गन्धकका नाम ॥—चक्षुष्या, कुलाली, कुलत्थिका, ३ गहतका नाम ॥—रीतिपुष्पम्, पुष्पकेतु, पुष्पकम्, कुसुमाञ्जनम्, पित्तलका कीटका नाम ॥—पिञ्जरम्, पीतनम्, तालम्, आलम्, हरितालकम्, ५ हरितालका नाम ॥—गैरेयम्, अर्थ्यम्, गिरिजम्, अश्मजम्, शिलाजतु, ५ शिलाजितका नाम ॥—बोलः, गन्धरसः, प्राणः, पिण्डः, गोपरसः, ५ गन्धरस (औषधी) विशेषका नाम ॥—

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नागसीसकयोगेष्टवप्राणि त्रपु पिच्चटम् १९१७
रङ्गवङ्गे अथ पिचुस्तूलोऽथ कमलोत्तरम् १९१८
स्यात्कुसुम्भं वह्निशिखं महारजनमित्यपि १९१९
मेषकम्बल ऊर्णायुः शशोर्णं शशलोमनि १९२०
मधु क्षौद्रं माक्षिकादि मधूच्छिष्टं तु सिक्थकम् १९२१
मनःशिला मनोगुप्ता मनोह्वा नागजिह्विका १९२२
नैपाली कुनटी गोला यवक्षारो यवाग्रजः १९२३
पाक्योऽथ सर्जिकाक्षारः कापोतः सुखवर्चकः १९२४
सौवर्चलं स्याद्रुचकं त्वक्क्षीरी वंशरोचना १९२५
शिग्रुजं श्वेतमरिचं मोरटं मूलमैक्षवम् १९२६

डिण्डीरः, अब्धिकफः, फेनः, ३ समुद्रका फेनका नाम ॥—सिन्दूरम्, नागसंभवम्, २ सिन्दूर (फुस्रा)का नाम ॥—नागम्, सीसकम्, योगेष्टम्, वप्रम्, ४ सीसाका नाम ॥—त्रपु, पिच्चटम्, रङ्गम्, वङ्गम्, ४ राङ्का नाम ॥—पिचुः, तूलः, २ रूवा (कपास)का नाम ॥—कमलोत्तरम्, कुसुम्भम्, वह्निशिखम्, महारजनम्, ४ कुसुम (वर्राकाफूल)को नाम ॥—मेषकम्बलः, ऊर्णायुः, २ कम्बल-राडी-पाखीका नाम ॥—शशोर्णम्, शशलोम, २ खरायोका रऊँका नाम ॥—मधु, क्षौद्रम्, माक्षिकम्, ३ मौरीले बनायेका महका नाम भ्रमर र पुत्काले लायेका महलाई कहँदामा भ्रामर-पौत्तिकः शब्द प्रयोग हुन्छन् ॥—मधूच्छिष्टम्, सिक्थकम्, २ मईनका नाम ॥—मनःशिला, मनोगुप्ता, मनोह्वा, नागजिह्विका, ४ मैनसिल (मनसिला)का नाम ॥—नैपाली, कुनटी, गोला, ३ नेपालमा हुने मनशिलाका नाम ॥—यवक्षारः, यवाग्रजः, पाक्यः, ३ जवाखारका नाम ॥—सर्जिकाक्षारः, कापोतः, सुखवर्चकः, ३ सज्जीखारका नाम ॥—सौवर्चलम्, रुचकम्, २ खार भेद या (सोच र) खारका नाम ॥—त्वक्क्षीरी, वंश-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ग्रन्थिकं पिप्पलीमूलं चटकाशिर इत्यपि १९२७
गोलोमी भूतकेशो ना पत्राङ्गं रक्तचन्दनम् १९२८
त्रिकटु त्र्यूषणं व्योषं त्रिफला तु फलत्रिकम् १९२९

इति वैश्यवर्गः ॥ ११. अथ शूद्रवर्गः

शूद्राश्चावरवर्णाश्च वृषलाश्च जघन्यजाः १९३०
आचण्डालात्तु संकीर्णा अम्बष्ठकरणादयः १९३१
शूद्राविशोस्तु करणोऽम्बष्ठो वैश्याद्विजन्मनोः १९३२
शूद्राक्षत्रिययोरुग्रो मागधः क्षत्रियाविशोः १९३३
माहिष्योऽर्याक्षत्रिययोः क्षत्तार्याशूद्रयोः सुतः १९३४
ब्राह्मण्यां क्षत्रियात्सूतस्तस्यां वैदेहको विशः १९३५

रोचना, २ वंशलोचनका नाम ॥—शिग्रुजम्, श्वेतमरिचम्, २ सेता मरीच (सहेजनका बीज)का नाम ॥ मोरटं १ उखुका जराको नाम ॥—ग्रन्थिकम्, पिप्पलीमूलम्, चटकाशिरः, ३ पिप्लामूलका नाम ॥—गोलोमी, भूतकेशः, २ जटामसीका नाम ॥—पत्राङ्गम्, रक्तचन्दनम्, २ वकम (रक्तसार) चन्द्रन विशेषका नाम ॥—त्रिकटु, त्र्यूषणम्, व्योषम्, ३ त्रिकटुः, सुठो-मरीच-पीपलाका नाम ॥—त्रिफला, फलत्रिकम्, २ त्रिफला (हर्रो-वर्रो-अमला ३ का समूहका नाम ॥

१९३०-२०२३ शूद्रः, अवरवर्णः, वृषलः, जघन्यजः, ४ शूद्रका नाम ॥ संकीर्णाः १ संकरको नाम ॥ करणः १ शूद्रामा पैदाभयेका वैश्यपुत्रको नाम ॥ अम्बष्ठः १ वैश्य कन्यामा ब्राह्मणवाट पैदा भयेका संकरको नाम ॥ उग्रः १ शूद्रामा क्षत्रीयवाट भयेका सन्तानको नाम ॥ मागधः १ क्षत्रियामा वैश्यवाट जन्मेका सन्तानको नाम॥ माहिष्यः १ वैश्य पुत्रीमा क्षत्रियवाट जन्मेका सन्तानको नाम ॥ क्षत्ता १ वैश्यपुत्रीमा शूद्रवाट जन्मेका सन्तानको नाम ॥ सूतः १ ब्राह्मणपुत्रीमा क्षत्रियवाट जन्मेका सन्तानको

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

रथकारस्तु माहिष्यात्करण्यां यस्य संभवः १९३६
स्याच्चण्डालस्तु जनितो ब्राह्मण्यां वृषलेन यः १९३७
कारुः शिल्पी संहतैस्तैर्द्वयोः श्रेणिः सजातिभिः १९३८
कुलकः स्यात्कुलश्रेष्ठी मालाकारस्तु मालिकः १९३९
कुम्भकारः कुलालः स्यात् पलगण्डस्तु लेपकः १९४०
तन्तुवायः कुविन्दः स्यात्तुन्नवायस्तु सौचिकः १९४१
रङ्गाजीवश्चित्रकरः शस्त्रमार्जोऽसिधावकः १९४२
पादूकृच्चर्मकारः स्याद्व्योकारो लोहकारकः १९४३
नाडिंधमः स्वर्णकारः कलादो रुक्मकारकः १९४४
स्याच्छाङ्खिकः काम्बविकः शौल्बिकस्ताम्रकुट्टकः १९४५

नाम ॥ वैदेहकः १ ब्राह्मणपुत्रीमा वैश्यबाट पैदाभयेका सन्तानको नाम ॥ रथकारः १ करणी (शूद्रामा जन्मेकी वैश्य पुत्रीमा) वैश्यामा क्षत्रियबाट जन्मेको छोरो माहिष्यः बाट जन्मेका सन्तानको नाम ॥ चण्डालः १ ब्राह्मणीमा जन्मेको शूद्रसन्तानको नाम ॥—कारुः, शिल्पी, २ कालीगडका नाम ॥ श्रेणिः १ कालीगडै कालीगडका समूहको नाम ॥ स्त्रीपुं.माछ ॥—कुलकः, कुलश्रेष्ठी, २ कालीगडका नाइकेका नाम ॥ मालाकारः, मालिकः, २ मालिका नाम ॥—कुम्भकारः, कुलालः, २ कुम्हालेका नाम ॥—पलगण्डः, लेपकः, २ लीपपोत गर्नेका नाम ॥—तन्तुवायः, कुविन्दः, २ जुलाहा (लुगा बुन्ने)का नाम ॥—तुन्नवायः, सौचिकः, २ सूचीकारका नाम ॥—रङ्गाजीवः, चित्रकरः, २ चित्रकारीका नाम ॥—शस्त्रमार्जः, असिधावकः, २ हात हतियारमा सानलाउने साफगर्नेका नाम ॥—पादूकृत्, चर्मकारः, २ चमार (सार्किका) नाम ॥—व्योकारः, लोहकारकः, २ कामीका नाम ॥—नाडिंधमः, स्वर्णकारः, कलादः, रुक्मकारकः, ४ सुनारका नाम ॥—शाङ्खिकः, काम्बविकः, २ शंखको चुरो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तक्षा तु वर्धकिस्त्वष्टा रथकारस्तु काष्ठतट् १९४६
ग्रामाधीनो ग्रामतक्षः कौटतक्षोऽनधीनकः १९४७
क्षुरी मुण्डी दिवाकीर्तिनापितान्तावसायिनः १९४८
निर्णेजकः स्याद्रजकः शौण्डिको मण्डहारकः १९४९
जाबालः स्यादजाजीवो देवाजीवस्तु देवलः १९५०
स्यान्माया शाम्बरी मायाकारस्तु प्रतिहारकः १९५१
शैलालिनस्तु शैलूष जायाजीवाः कृशाश्विनः १९५२
भरता इत्यपि नटाश्चारणास्तु कुशीलवाः १९५३
मार्दङ्गिका मौरजिकाः पाणिवादास्तु पाणिघाः १९५४
वेणुध्माः स्युर्वैणविका वीणावादास्तु वैणिकाः १९५५

आदि बनाउनेका नाम ॥—शौल्बिकः, ताम्रकुट्टकः, २ कसाल (तावाका भाडा वर्तन) बनाउनेका नाम ॥—तक्षा, वर्धकिः, त्वष्टा, रथकारः, काष्ठतट्, ५ सिकर्मिका नाम ॥ ग्रामतक्षः १ गाउलेले बालीभरेर काम लाईने सिकर्मीको नाम ॥ अनधीनकः, कौटतक्षः, १ आफु खुसी सिकर्मीको नाम ॥—क्षुरी, मुण्डी, दिवाकीर्तिः, नापितः, अन्तावसायी, ५ नाउ (हजाम)का नाम ॥—निर्णेजकः, रजकः, २ धोबीका नाम ॥—शौण्डिकः, मण्डहारकः, २ सूँढी (जाँडरक्सीको) काम गर्नेका नाम ॥—जाबालः, अजाजीवः, २ बाका बाख्रा पालेर जीविका गर्नेका नाम ॥—देवाजीवः, देवलः २ पूजाहारीका नाम ॥—माया, शाम्बरी, २ चटकका नाम ॥—मायाकारः, प्रतिहारकः, २ चटकगर्नेका नाम ॥—शैलाली, शैलूषः, जायाजीवः, कृशाश्वी, भरतः, नटः, ६ नटुवाका नाम ॥—चारणः, कुशीलवः, २ कत्थकका नाम ॥—मार्दङ्गिकाः, मौरजिकाः, २ मृदङ्ग बजाउन जान्नेका नाम ॥—पाणिवादाः, पाणिघाः, २ हातले ताली बजाउन जान्नेका नाम ॥—वेणुध्माः, वैणविकाः, २ बाँसुरी बजाउन जान्नेका नाम ॥—वीणावादाः, वैणिकाः, २

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

जीवान्तकः शाकुनिको द्वौ वागुरिकजालिकौ १९५६
वैतंसिकः कौटिकश्च मांसिकश्च समं त्रयम् १९५७
भृतको भृतिभुक्कर्मकरो वैतनिकोऽपि सः १९५८
वार्तावहो वैवधिको भारवाहस्तु भारिकः १९५९
विवर्णः पामरो नीचः प्राकृतश्च पृथग्जनः १९६०
निहीनोऽपसदो जाल्मः क्षुल्लकश्चेतरश्च सः १९६१
भृत्ये दासेरदासेयदासगोप्यकचेटकाः १९६२
नियोज्यकिङ्करप्रैष्यभुजिष्यपरिचारकाः १९६३
पराचितपरिस्कन्दपरजातपरैधिताः १९६४
मन्दस्तुन्दपरिमृज आलस्यः शीतकोऽलसोऽनुष्णः १९६५
दक्षे तु चतुरपेशलपटवः सूत्थान उष्णश्च १९६६

वीणा बजाउन जान्नेका नाम ।।—जीवान्तकः, शाकुनिकः, २ चरा चुरुङ्गीको शिकार गर्नेका नाम ।।—वागुरिकः, जालिकः, २ जालहान्ने जालथाप्ने मृगमारनेका नाम ।।—वैतंसिकः, कौटिकः, मांसिकः, ३ बकर-कसाई (मासु बेच्नेका) नाम ।।—भृतकः, भृतिभुक्, कर्मकरः, वैतनिकः, ४ ज्यालावाला र तनखावालाका नाम ।।—वार्तावहः, वैवधिकः, २ हाल खवर पुऱ्याउने (हुलाकी) का नाम ।।—भारवाहः, भारिकः, २ भारी बोक्नेका नाम ।।—विवर्णः, पामरः, नीचः, प्राकृतः, पृथग्जनः, निहीनः, अपसदः, जाल्मः, क्षुल्लकः, इतरः, १० नीच (हल्का) मामुली मानिसका नाम ।।—भृत्यः, दासेरः, दासेयः, दासः, गोप्यकः, चेटकः, नियोज्यः, किङ्करः, प्रैष्यः, भुजिष्यः, परिचारकः, ११ दास (नोकर चाकर) का नाम ।।—पराचितः, परिस्कन्दः, परजातः, परैधितः, ४ विनातनखाका भतुवाका नाम ।।—मन्दः, तुन्दपरिमृजः, आलस्यः, शीतकः, अलसः, अनुष्णः, ६ अल्छीका नाम ।।—दक्षः, चतुरः,

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

चण्डालप्लवमातङ्गदिवाकीर्तिजनंगमाः १९६७
निषादश्वपचावन्तेवासिचाण्डालपुक्कसाः १९६८
भेदाः किरातशबरपुलिन्दा म्लेच्छजातयः १९६९
व्याधो मृगवधाजीवो मृगयुर्लुब्धकोऽपि सः १९७०
कौलेयकः सारमेयः कुक्कुरो मृगदंशकः १९७१
शुनको भषकः श्वा स्यादलर्कस्तु स योगितः १९७२
श्वा विश्वकद्रुर्मृगयाकुशलः सरमा शुनी १९७३
विट्चरः सूकरो ग्राम्यो वर्करस्तरुणः पशुः १९७४
आच्छोदनं मृगव्यं स्यादाखेटो मृगया स्त्रियाम् १९७५
दक्षिणारुर्लुब्धयोगाद्दक्षिणेर्मा कुरङ्गकः १९७६
चौरैकागारिकस्तेनदस्युतस्करमोषकाः १९७७
प्रतिरोधिपरास्कन्दिपाटच्चरमलिम्लुचाः १९७८

पेशलः, पटुः, सूत्थानः, उष्णः, ६ जाँगरीलाका नाम ॥ चण्डालः, प्लवः, मातङ्गः, दिवाकीर्तिः, जनंगमः, निषादः, श्वपचः, अन्तेवासी, चाण्डालः, पुक्कसः, १० चाण्डाल (पोडे) का नाम ॥—किरातः, शबरः, पुलिन्दः, ३ म्लेच्छजाति (किरात शबर-पुलिन्द)का नाम ॥—व्याधः, मृगवधाजीवः, मृगयुः, लुब्धकः, ४ व्याधाका नाम ॥—कौलेयकः, सारमेयः, कुक्कुरः, मृगदंशकः, शुनकः, भषकः, श्वा, ७ कुक्कुरका नाम । अलर्कः १ बहुलायेका कुक्कुरको नाम । विश्वकद्रुः १ शिकारी कुकुरको नाम । शुनी सरमा २ कुक्कुर्नीका नाम । ग्राम्यः, सूकरः, विट्चरः, १ सुँगुरका नाम । वर्करः, १ तरुण पशुका नाम ॥—आच्छोदनम्, मृगव्यम्, आखेटः, मृगया, ४ शिकार खेलुवाका नाम ॥ दक्षिणेर्मा १ दाहिनेकोखापट्टिघाइते भयेका मृगको नाम ॥ चौरः, ऐकागारिकः, स्तेनः, दस्युः, तस्करः, मोषकः, प्रतिरोधिः,

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

चौरिका स्तैन्यचौर्ये च स्तेयं लोप्त्रं तु तद्धने १९७९
वीतंसस्तूपकरणं बन्धने मृगपक्षिणाम् १९८०
उन्माथः कूटयन्त्रं स्याद्वागुरा मृगबन्धनी १९८१
शुल्बं वराटकं स्त्री तु रज्जुस्त्रिषु वटी गुणः १९८२
उद्घाटनं घटीयन्त्रं सलिलोद्वाहनं प्रहेः १९८३
पुंसि वेमा वायदण्डः सूत्राणि नरि तन्तवः १९८४
वाणिर्व्यूतिः स्त्रियौ तुल्ये पुस्तं लेप्यादिकर्मणि १९८५
पाञ्चालिका पुत्रिका स्याद्वस्त्रदन्तादिभिः कृता १९८६
जतुत्रपुविकारे तु जातुषं त्रापुषं त्रिषु १९८७
पिटकः पेटकः पेटा मञ्जूषाथ विहङ्गिका १९८८

परास्कन्दिः, पाटच्चरः, मलिम्लुचः, १० चोरका नाम। चौरिकाः, स्तैन्यम्, स्तेयम्, चौर्यम्, ४ चोरी (चोर्ना)का नाम। चौर्यं धनं लोप्त्रं १ दसीको नाम। मृगपक्षिणां बन्धने यदुपकरणं स वीतंसः १ शिकार खेलने सर्जामका नाम ॥—उन्माथः, कूटयन्त्रम्, २ खोर (शिकार बल्झाउनेयन्त्र)का नाम ॥—वागुरा, मृगबन्धनी, २ पासो (सिकार वल्झाउने डोरी) को नाम ॥—शुल्बम्, वराटकम्, रज्जुः, वटी, गुणः, ५ साधारण डोरीका नाम। रज्जुः स्त्रीलि. छ वटी त्रिलिङ्गी छ। उद्घाटनम्, घटीयन्त्रम्, २ रहाट ईनारबाट पानी झिक्ता गाग्रो झुण्ड्याउने काठ बाँसका नाम ॥—वेमा, वायदण्डः, २ कपडा बुन्दा गजपट्टि ठोक्ने चेप्टो काठका नाम ॥—सूत्राणि, तन्तवः, २ धागाका नाम। तन्तु पुंलिङ्गछ ॥—वाणिः, व्यूतिः, २ वस्त्र बुन्नाका नाम। पुस्तः १ माटो, लकडी, वस्त्र छाला-धातु रत्न इत्यादि वस्तुलेकालीगडी गर्नुका नाम। पाञ्चालिका १ पुत्तली काठवस्त्र इत्यादिले बनाःयेका मूर्तिको नाम। दन्तो गजदन्तः, आदि पदले चर्म माटो पत्थर हेरू अनेकलिईन्छन्। जतुविकारो जातुषम् १ लाहाले बनेका वस्तुको नाम।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भारयष्टिस्तदालम्बि शिक्यं काचोऽथ पादुका १९८९
पादूरुपानत्स्त्री सैवानुपदीना पदायता १९९०
नध्री वध्री वरत्रा स्यादश्वादेस्ताडनी कशा १९९१
चाण्डालिका तु कण्डोलवीणा चण्डालवल्लकी १९९२
नाराची स्यादेषणिका शाणस्तु निकषः कषः १९९३
व्रश्चनः पत्रपरशुरीषिका तूलिका समे १९९४
तैजसावर्तनी मूषा भस्त्रा चर्मप्रसेविका १९९५
आस्फोटनी वेधनिका कृपाणी कर्तरी समे १९९६
वृक्षादनी वृक्षभेदी टङ्कः पाषाणदारणः १९९७

त्रपुविकारस्त्रापुषम् १ सीसाले बनेका बस्तुको नाम ॥—पिटकः पेटकः, पेटा, मञ्जूषा, ४ पेटारो संदूस-वाकस्-कन्तूर-वेगका नाम ॥—विहङ्गिका, भारयष्टिः, २ बँहगी (नोल)का नाम। शिक्यम्, काचः, २ नोलमा झुण्ड्याउने शिकार खरपनका नाम ॥—पादुका, पादूः, उपानत्, ३ जुताका खराब बूट चट्टीका नाम। अनुपदीना १ मोजा-लामुमोजाका नाम ॥—नध्री, वध्री, वरत्रा, ३ छालाका डोरीका नाम ॥—कशा १ घोडा आदिलाई कुट्नेकोर्राको नाम ॥ चाण्डालिका, कण्डोलवीणा, चण्डालवल्लकी, ३ चाण्डालले बजाउने सारङ्गीका नाम ॥—नाराची, एषणिका, २ काँटा (सुनारले सुन् जोख्ने सानु तराजूका नाम ॥—शाणः, निकषः, कषः, ३ कसी (सुन्-चादि जाच्ने) ढुङ्गाका नाम ॥—व्रश्चनः, पत्रपरशुः, २ सुन् चाँदी काटने छिनुका नाम ॥—ईषिका, तूलिका, २ सुन् चाँदीमा वान्गी चढाउदा मसला लाउने सानू कूचीका नाम। मूषा १ भोचा (सुन् चादि पगाल्ने भाँडाका नाम ॥ भस्त्रा, चर्मप्रसेविका, २ खलाँतीका नाम ॥—आस्फोटनी, वेधनिका, २ मोती मणिका नाम ॥—कृपाणी, कर्तरी, २ कतर्नू (कैंची)का नाम ॥—वृक्षादनी, वृक्षभेदी, २ बोसिलाका नाम ॥—

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

क्रकचोऽस्त्री करपत्रमारा चर्मप्रभेदिका १९९८
सूर्मी स्थूणायःप्रतिमा शिल्पं कर्म कलादिकम् १९९९
प्रतिमानं प्रतिबिम्बं प्रतिमा प्रतियातना प्रतिच्छाया २०००
प्रतिकृतिरर्चा पुंसि प्रतिनिधिरुपमोपमानं स्यात् २००१
वाच्यलिङ्गाः समस्तुल्यः सदृक्षः सदृशः सदृक् २००२
साधारणः समानश्च स्युरुत्तरपदे त्वमी २००३
निभसंकाशनीकाशप्रतीकाशोपमादयः २००४
कर्मण्या तु विधाभृत्याभृतयो भर्म वेतनम् २००५
भरण्यं भरणं मूल्यं निर्वेशः पण इत्यपि २००६
सुरा हलिप्रिया हाला परिस्रुद्वरुणात्मजा २००७

टङ्कः, पाषाणदारणः, २ पत्थर काट्ने फौरने टाँकी-छिनु घन आदिका नाम ।।—क्रकचः, करपत्रम्, २ करौंती आरा आरी आदिकाठचिर्ने हथियारका नाम ।।—आरा, चर्मप्रभेदिका, २ (बाँक) जुतासिउने सार्किले छालाकाटले शस्त्र विशेषका नाम ।।—सूर्मी, स्थूणा, अयः प्रतिमा, ३ फलामका मूर्ति प्रतिमा (इष्टाचू)का नाम । तच्छिल्पम् १ सीप-कुशलपना कालीगडीको नाम ।।—प्रतिमानम्, प्रतिबिम्बम्, प्रतिमा, प्रतियातना, प्रतिच्छाया, प्रतिकृतिः, अर्चा, प्रतिनिधिः, ८ प्रतिबिम्ब (फोटो) तस्वीर, छायाका नाम ।। प्रतिनिधिः, पुंलिङ्गछ ।।—उपमा, उपमानम्, २ सादृश्य- (तुल्याता-समान बराबर)का नाम ।। समः, तुल्यः, सदृक्षः, सदृशः, सदृक्, साधारणः, समानः, ७ तुल्य समान-बराबरका नाम ।।—निभः, संकाशः, नीकाशः, प्रतीकाशः, उपमा, ५ समासमा उत्तर पदभैकन तुलयता बुझाउने समास नगरेमा प्रयोगै नहुने सादृश्य वाचक शब्द जस्तै राजनिभः, राज-संकाशः इत्यादि जान्नु ।।—कर्मण्या, विधा, भृत्या, भृतिः, भर्म, वेतनम्, भरण्यम्, भरणम्, मूल्यम्, निर्वेशः, पणः, ११ ज्याला (तनखा) वेतनका नाम ।।-सुरा, हलिप्रिया, हाला, परिस्रुत्, वरुणात्मजा, गन्धोत्तमा, प्रसन्ना, इरा,

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

गन्धोत्तमाप्रसन्नेराकादम्बर्यः परिस्रुता २००८
मदिरा कश्यमद्ये चाप्यवदंशस्तु भक्षणम् २००९
शुण्डापानं मदस्थानं मधुवारा मधुक्रमाः २०१०
मध्वासवो माधवको मधु माध्वीकमद्वयोः २०११
मैरेयमासवः सीधुर्मेदको जगलः समौ २०१२
संधानं स्यादभिषवः किण्वं पुंसि तु नग्नहूः २०१३
कारोत्तरः सुरामण्ड आपानं पानगोष्ठिका २०१४
चषकोऽस्त्री पानपात्रं सरकोऽप्यनुतर्षणम् २०१५
धूर्तोऽक्षदेवी कितवोऽक्षधूर्तो द्यूतकृत्समाः २०१६
स्युर्लग्नकाः प्रतिभुवः सभिका द्यूतकारकाः २०१७

कादम्बरी, परिस्रुत्, मदिरा, कश्यम्, मद्यम्, १२ मदिरा (जाँड् रक्सी)का नाम ॥ अवदंशः, १ मदिरा पिउँदा साथमा खाईने सितन निमकिन चना आदि चबाईनेको नाम ॥—शुण्डापानम्, मदस्थानम्, २ भट्टि (रक्सी बनाउने घर)का नाम ॥—मधुवारः, मधुक्रमः, २ मदिरा पानगर्दा हुने छौंटकाट परिपाटि (दशा)का नाम ॥—मध्वासवः, माधवकः, मधु, माध्वीकम्, ४ महुवाका रक्सीका नाम ॥—माध्वीकं मधु पुं. लिं.र नपुं.माछ ॥—मैरेयम्, आसवः, सीधुः, ३ उखु शाक आदिले बनायेका रक्सीका नाम ॥—मेदकः, जगलः, २ जाँडका कट (छोक्रा)का नाम ॥—संधानम्, अभिषवः, २ मदिरा बनाउन अन्न आदि कुहाउने कामका नाम ॥—किण्वम्, नग्नहूः, २ जाँड रक्सी बनाउँदा हाल्नु पर्ने मसाला (मर्चा)का नाम ॥ कारोत्तरः १ मदिराका माडको (जाँड)को नाम ॥—आपानम्, पानगोष्ठिका, २ रक्सी पिउनेका जमाव (डप्फा)का नाम ॥—चषकः, पानपात्रम्, २ मदिरा पिउने पस्कने भाँडा (डवका) (प्याला)का नाम ॥—चषकः पुं. नपुं.माछ ॥—सरकः, अनुतर्षणम्, २ मदिरा पानका नाम ॥—धूर्तः, अक्षदेवी, कितवः, अक्षधूर्तः, द्यूतकृत्, ५ जुवाडेका नाम ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

द्यूतोऽस्त्रियामक्षवती कैतवं पण इत्यपि २०१८
पणोऽक्षेषु ग्लहोऽक्षास्तु देवनाः पाशकाश्च ते २०१९
शारोऽक्षगुटिका शारिः शारिका सारिकेत्यपि ❀❀
परिणायस्तु शारीणां समन्तान्नयनेऽस्त्रियाम् २०२०
अष्टापदं शारिफलं प्राणिद्यूतं समाह्वयः २०२१
उक्ता भूरिप्रयोगत्वादेकस्मिन्येऽत्र यौगिकाः २०२२
ताद्धर्म्यादन्यतो वृत्तावूह्या लिङ्गान्तरेऽपि ते २०२३

१२. काण्डसमाप्तिः

इत्यमरसिंहकृतौ नामलिङ्गानुशासने २०२४
द्वितीयः काण्डो भूम्यादिः साङ्ग एव समर्थितः २०२५

—लग्नकः, प्रतिभूः, २ जमानी (जमानत)का नाम ॥—सभिकाः, द्यूतकारकाः, २ जुवा खेलाउने (खाल राख्ने)का नाम ॥—द्यूतः, अक्षवती, कैतवम्, पणः, ४ जूवाका नाम ॥—पणः, ग्लहः, २ च्याँखे थपनीका नाम ॥—अक्षः, देवनः, पाशकः, ३ पाशाका नाम ॥—शारः, अक्षगुटिका, शारिः, शारिका, सारिका, ५ गोटिका नाम ॥ परिणाय १ गोटी चाल्नाका नाम ॥—अष्टापदम्, शारिफलम्, २ थर्कौका नाम ॥—प्राणिद्यूतं समाह्वयः २ बट्टाई भेडा आदि लडायेर बाजी थाप्नाका नाम ॥ यो काण्ड र वर्गमा प्रायः पुंलिङ्ग प्रभृतिमा प्रयोग देखियेका यौगिक शब्द पुंलिङ्गी आदि देखियेतापनि योगार्थ लियेर अरु अरु लिङ्गमा पनी रहन शक्तछन् भनि जान्नु। अपि शब्दले गर्दा करण कुलाल आदि शब्द पनि पुंलिङ्ग स्त्रीलिङ्ग हुन शक्तछन् भन्ने कुरो जान्नु ॥

२०२४–२०२५ म अमरसिंहले बनायेका नामलिंगानुशासनमा भूमी आदि द्वितीयः कण्डः साङ्गोपाङ्ग एव समर्थितः कहियो ॥

इति श्री पं० द्वारिकानाथाचार्यात्मजस्य पं० शिवलालाचार्यस्य सुपुत्रेण शुक्लयजुर्वेदाचार्येण साहित्यवेदान्तशास्त्रिणा पं० बालकृष्णाचार्येण विरचितायां बालकृष्णाश्रम्यां नेपालीटीकायां द्वितीयः काण्डः समाप्तः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथ—तृतीयं काण्डम्

१. वर्गभेदाः

विशेष्यनिघ्नैः संकीर्णैर्नानार्थैरव्ययैरपि २०२६
लिङ्गादिसंग्रहैर्वर्गाः सामान्ये वर्गसंश्रयाः २०२७

२. परिभाषा

स्त्रीदाराद्यैर्यद्विशेष्यं यादृशः प्रस्तुतं पदैः २०२८
गुणद्रव्यक्रियाशब्दास्तथा स्युस्तस्य भेदकाः २०२९

२०२६–२०२७ सामान्य यो तृतीय काण्डमा, विशेष्यनिघ्न, संकीर्ण, नानार्थ, अव्यय लिङ्गादिसंग्रह इ ५ वर्ग कहिन्छन् ॥ विशेष्य वाचक शब्दका अधीनमा रहने अर्थात् विशेष्यवाचक शब्दको जुन् लिङ्गछ त्यसैलिङ्गमा रहन्छन्—विशेष्यका अधीनमा रहन्छन् स्वतन्त्र छैनन् ॥ अरु वर्गको रीति (परिभाषा) तत्तत् वर्गमा लेखिनेछ ॥ यस वर्गका शब्दको प्रयोग गर्दा विशेष्यवाचक शब्दको लिङ्ग जुन्छ, त्यसैलिङ्गको रूप बनायेर प्रयोग गर्नु ॥ गुणिवाचक, द्रव्यवाचक, क्रियावाचक, शब्द जहाँसुकै पर्नि, विशेष्यवाचक शब्दको जुन् लिङ्गछ तेही लिङ्गमा रहन्छन् ॥

२०२८–२०२९ गुणविशिष्ट जस्तै सुकृतिनी स्त्री, सुकृतिनः दाराः, सुकृति कलत्रम्, व्याहाँ ३ तीनै रूपमा पुण्यात्मा स्त्री, यही अर्थ होता पनि स्त्री-वाचक शब्द क्रमैले स्त्रीलिङ्ग पुंलिङ्ग नपुंसक ३ लिङ्गमा रहेको हुनाले, सुकृति शब्द स्त्रीवाचक नभयेतापनि विशेष्य (स्त्री) वाचक स्त्री दार कलत्र शब्द बमोजिम क्रमैले तीन लिङ्गमा रह्यो ॥ द्रव्यविशिष्ट जस्तै दण्डि कुलम्, दण्डिनी स्त्री दण्डिनो दाराः, इत्यादि क्रिया विशिष्ट जस्तै पाचिका स्त्री, पाचकाः दाराः, पाचकम् कुलम् इत्यादि शब्द विशेष्यका अधीनमा रहन्छन् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

३. विशेष्यनिघ्नवर्गः

सुकृती पुण्यवान्धन्यो महेच्छस्तु महाशयः २०३०
हृदयालुः सुहृदयो महोत्साहो महोद्यमः २०३१
प्रवीणे निपुणाभिज्ञविज्ञनिष्णातशिक्षिताः २०३२
वैज्ञानिकः कृतमुखः कृती कुशल इत्यपि २०३३
पूज्यः प्रतीक्ष्यः सांशयिकः संशयापन्नमानसः २०३४
दक्षिणीयो दक्षिणार्हस्तत्र दक्षिण्य इत्यपि २०३५
स्युर्वदान्यस्थूललक्ष्यदानशौण्डा बहुप्रदे २०३६
जैवातृकः स्यादायुष्मानन्तर्वाणिस्तु शास्त्रवित् २०३७
परीक्षकः कारणिको वरदस्तु समर्धकः २०३८
हर्षमाणो विकुर्वाणः प्रमना हृष्टमानसः २०३९

२०३०-२०५० सुकृती, पुण्यवान्, धन्यः, ३ भाग्यमानीका नाम ॥—महेच्छः, महाशयः, २ ठूलो इच्छा हुनेका नाम ॥—हृदयालुः, सुहृदयः, २ शुद्ध मन हुनेका नाम ॥—महोत्साहः, महोद्यमः, २ ठूलो उत्साह गर्नेका नाम ॥—प्रवीणः, निपुणः, अभिज्ञः, विज्ञः, निष्णातः, शिक्षितः, वैज्ञानिकः, कृतमुखः, कृती, कुशलः, १० सिपालुका नाम ॥—पूज्यः, प्रतीक्ष्यः, २ मान्नु पर्ने पूज्यका नाम ॥—सांशयिकः, संशयापन्नमानसः, २ सन्देह मान्नेका नाम ॥—दक्षिणीयः, दक्षिणार्हः, दक्षिण्यः, ३ दक्षिणा दिन योग्य (सत्पात्र)का नाम ॥—वदान्यः, स्थूललक्ष्यः, दानशौण्डः, बहुप्रदः, ४ धेरै दान गर्नेका नाम ॥—जैवातृकः, आयुष्मान्, २ पूरा (दीर्घायु) हुनेका नाम ॥—अन्तर्वाणिः, शास्त्रवित्, २ शास्त्र जान्नेका नाम ॥—परीक्षकः, कारणिकः, २ प्रमाणले अर्थ निश्चय गर्ने (परीक्षक)का नाम ॥—वरदः, समर्धकः २ वर (इच्छा) लागेको वस्तु दिनेका नाम ॥—हर्षमाणः, विकुर्वाणः, प्रमनाः, हृष्टमानसः, ४ प्रसन्न (खुशी) हुनेका नाम ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दुर्मना विमना अन्तर्मनाः स्यादुत्क उन्मनाः २०४०
दक्षिणे सरलोदारौ सुकलो दातृभोक्तरि २०४१
तत्परे प्रसितासक्ताविष्टार्थोद्युक्त उत्सुकः २०४२
प्रतीते प्रथितख्यातवित्तविज्ञातविश्रुताः २०४३
गुणैः प्रतीते तु कृतलक्षणाहतलक्षणौ २०४४
इभ्य आढ्यो धनी स्वामी त्वीश्वरः पतिरीशिता २०४५
अधिभूर्नायको नेता प्रभुः परिवृढोऽधिपः २०४६
अधिकर्द्धिः समृद्धः स्यात् कुटुम्बव्यापृतस्तु यः २०४७
स्यादभ्यागारिकस्तस्मिन्नुपाधिश्च पुमानयम् २०४८
वराङ्गरूपोपेतो यः सिंहसंहननो हि सः २०४९
निर्वार्यः कार्यकर्ता यः संपन्नः सत्त्वसंपदा २०५०

—दुर्मनाः, विमनाः, अन्तर्मनाः, ३ दिक्दार (व्याकुल चित्त हुने) का नाम ॥—उत्कः, उन्मनाः, २ मन्लागेको कुरो हेर्न सुन्न हत्पताउनेका नाम ॥—दक्षिणः, सरलः, उदारः, ३ सोझो चित्त हुनेका नाम ॥—दातृभोक्तरि सुकलः १ दिने खानेको नाम ॥—तत्परः, प्रसितः, आसक्तः, ३ केही कार्यमा तत्पर हुनेका नाम ॥—इष्टार्थोद्युक्तः, उत्सुकः, २ अभिलषित वस्तुमा उद्योग गर्नेका नाम ॥—प्रतीतः, प्रथितः, ख्यातः, वित्तः, विज्ञातः, विश्रुतः, ६ प्रसिद्ध भयेका का नाम ॥—कृतलक्षणः, आहतलक्षणः, २ सौर्यादि गुणले प्रसिद्ध भयेकाका नाम ॥—इभ्यः, आढ्यः, धनी, ३ धनीका नाम ॥—स्वामी, ईश्वरः, पतिः, ईशिता, अधिभूः, नायकः, नेता, प्रभुः, परिवृढः, अधिपः, १० स्वामी (मालिक) का नाम ॥—अधिकर्द्धिः, समृद्धः, २ अधिक धन हुनेका नाम ॥—कुटुम्बव्यापृतः, अभ्यागारिकः, उपाधिः, ३ बहुकुटुम्बी (जाहानियाँ)का नाम । वरैरङ्गरूपै-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अवाचि मूकोऽथ मनोजवसः पितृसंनिभः २०५१
सत्कृत्यालंकृतां कन्यां यो ददाति स कूकुदः २०५२
लक्ष्मीवाँल्लक्ष्मणः श्रीलः श्रीमान्स्निग्धस्तु वत्सलः २०५३
स्याद्दयालुः कारुणिकः कृपालुः सूरतः समाः २०५४
स्वतन्त्रोऽपावृतः स्वैरी स्वच्छन्दो निरवग्रहः २०५५
परतन्त्रः पराधीनः परवान्नाथवानपि २०५६
अधीनो निघ्न आयत्तोऽस्वच्छन्दो गृह्यकोऽप्यसौ २०५७
खलपूः स्याद्बहुकरो दीर्घसूत्रश्चिरक्रियः २०५८
जाल्मोऽसमीक्ष्यकारी स्यात्कुण्ठो मन्दः क्रियासु यः २०५९
कर्मक्षमोऽलंकर्मीणः क्रियावान्कर्मसूद्यतः २०६०

रुपेतो यः स सिंहसंहननः १ शरीर र रूप राम्रो हुनेको नाम ।। निर्वार्य १ सुखदुःखमा समान रहेर स्वकर्तव्य पालन गर्नेको नाम ।। अवाक्, मूकः, २ लाटाका नाम ।।—मनोजवसः, पितृसन्निभः, २ बाबू जस्तै छोराका नाम । आदरपूर्वकमलंकृतां कन्यां यो ददाति स कूकुदः १ शृङ्गार गरेकी कन्या विधि पूर्वक योग्यवरलाई दिनेको नाम ।।—लक्ष्मीवान्, लक्ष्मणः, श्रीलः, श्रीमान्, ४ धन र गृह सोभा प्रसस्त हुनेका नाम ।।—स्निग्धः वत्सलः, २ प्रेम गर्नेका नाम ।।—दयालुः, कारुणिकः, कृपालुः, सूरतः, ४ दयावान् (दयागर्ने)का नाम ।। स्वतन्त्रः, अपावृतः, स्वैरी, स्वच्छन्दः, निरवग्रहः, ५ आफु खुसीका नाम ।।—परतन्त्रः, पराधीनः, परवान्, नाथवान्, ४ परतन्त्र (अर्काका अधीनमा रहने)का नाम ।।—अधीनः निघ्नः आयत्तः अस्वच्छन्दः, गृह्यकः ५ वशमा अधीनका नाम ।।—खलपूः, बहुकरः, २ खलो बढार्ने र साधारण झाडू बढारू गर्नेका नाम ।।— दीर्घसूत्रः, चिरक्रियः, २ दीर्घसूत्र (झुंसा) का नाम ।।—जाल्मः, असमीक्ष्य-कारी २ विचार नगरी काम गर्नेका नाम । यः क्रियासु मन्दः स कुण्ठः १

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स कार्मः कर्मशीलो यः कर्मशूरस्तु कर्मठः २०६१
भरण्यभुक्कर्मकरः कर्मकारस्तु तत्क्रियः २०६२
अपस्नातो मृतस्नात आमिषाशी तु शौष्कलः २०६३
बुभुक्षितः स्यात्क्षुधितो जिघत्सुरशनायितः २०६४
परान्नः परपिण्डादो भक्षको घस्मरोऽद्मरः २०६५
आद्यूनः स्यादौदरिको विजिगीषाविवर्जिते २०६६
उभौ त्वात्मंभरिः कुक्षिंभरिः स्वोदरपूरके २०६७
सर्वान्नीनस्तु सर्वान्नभोजी गृध्नुस्तु गर्धनः २०६८
लुब्धोऽभिलाषुकस्तृष्णक्समौ लोलुपलोलुभौ २०६९
सोन्मादस्तून्मदिष्णुः स्यादविनीतः समुद्धतः २०७०

काम झट्ट गर्न न शक्नेको नाम ।।—कर्मक्षमः, अलंकर्मीणः, २ सहजैले काम पत्ते गर्नेका नाम ।।—क्रियावान् १ काममा लागी रहनेको नाम ।।—कार्मः, कर्मशीलः, २ काम गरी रहने स्वभाववालाका नाम ।। कर्मशूरः, कर्मठः, २ काममा शूरिनेका नाम ।।—भरण्यभुक्, कर्मकरः, २ ज्याला (वेतन) लियेर काम गर्ने खेतालाका नाम ।। कर्मकारः १ बिना वेतन काम गर्नेका नाम ।।— अपस्नातः, मृतस्नातः, २ खल्को हाल्नेका नाम ।।—आमिषाशी, शौष्कलः, २ माछा मासु खानेका नाम ।।—बुभुक्षितः, क्षुधितः, जिघत्सुः, अशनायितः, ४ भोकायेकाका नाम ।।—परान्नः, परपिण्डादः, २ आर्काका अन्नले जीविका गर्नेका नाम ।।—भक्षकः, घस्मरः, अद्मरः, ३ खञ्चुवाका नाम ।।—आद्यूनः, औदरिकः, १ पेटमात्र पाल्न पाये पुग्ने विशेष उन्नति नगर्नेका नाम :।।—आत्मंभरिः, कुक्षिंभरिः, २ आफ्नु पेटभर्नपाये पुग्ने आर्काको वास्ता नगर्नेका नाम ।। सर्वान्नीनः, सर्वान्नभोजी, २ सबैको अन्न खानेका नाम ।। गृध्नुः गर्धनः, लुब्धः, अभिलाषुकः, तृष्णक्, ५ लोभीका नाम ।।—लोलुपः लोलुभः, २ ज्यादा लोभीका नाम ।।—

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मत्ते शौण्डोत्कटक्षीबाः कामुके कमिताऽनुकः २०७१
कम्रः कामयिताऽभीकः कमनः कामनोऽभिकः २०७२
विधेयो विनयग्राही वचनेस्थित आश्रवः २०७३
वश्यः प्रणेयो निभृतविनीतप्रश्रिताः समाः २०७४
धृष्टे धृष्णग्वियातश्च प्रगल्भः प्रतिभान्विते २०७५
स्यादधृष्टे तु शालीनो विलक्षो विस्मयान्विते २०७६
अधीरे कातरस्त्रस्ते भीरुभीरुकभीलुकाः २०७७
आशंसुराशंसितरि गृहयालुर्ग्रहीतरि २०७८
श्रद्धालुः श्रद्धया युक्ते पतयालुस्तु पातुके २०७९
लज्जाशीलेऽपत्रपिष्णुर्वन्दारुरभिवादके २०८०

सोन्मादः, उन्मदिष्णुः, २ उन्मादवाला (पागल) का नाम ॥—अविनीतः, समुद्धतः, २ अविनीतः (उद्धत ठाडा)का नाम ॥—मत्तः, शौण्डः, उत्कटः, क्षीबः, ४ मत्त (भाङ् रक्सी प्रभृतिले वेहोस-भयेका)का नाम ॥—कामुकः, कमिता, अनूकः, कम्रः, कामयिता, अभीकः, कमनः, कामनः, अभिकः, ९ कामी (स्त्रीमालम्पट)का नाम ॥—विधेयः, विनयग्राही, वचनेस्थितः, आश्रवः, ४ अह्रायेको मान्नेका नाम ॥—वश्यः, प्रणेयः, २ वसमा पर्नेका नाम ॥—निभृतः, विनीतः, प्रश्रितः, ३ नम्रका नाम ॥—धृष्टः, धृष्णक्, वियातः, ३ धृष्ट ढिढाका नाम ॥—प्रगल्भः, प्रतिभान्वितः, २ बखतमा बुद्धि फुर्नेका नाम ॥—अधृष्टः, शालीनः, २ अधृष्ट (धकाउने)का नाम ॥—विलक्षः, विस्मयान्वितः, २ आश्चर्य मान्नेका नाम ॥—अधीरः, कातरः २ कातरका नाम ॥—त्रस्तः भीरुः, भीरुकः, भीलुकः, ४ डरछेरूवाका नाम ॥—आशंसुः, आशंसिता, २ आसा (उमेद) गर्नेका नाम ॥—गृहयालुः, ग्रहीता, २ भनेको लिने (ग्रहण) गर्नेका नाम ॥—श्रद्धालुः १ श्रद्धा गर्नेको नाम ॥—पतयालुः, पातुकः, २ खस्ने (गिर्नेका) नाम ॥—लज्जाशीलः, अपत्रपिष्णुः, २ लज्जा मान्नेका

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शरारुर्घातुको हिंस्रः स्याद्वर्धिष्णुस्तु वर्धनः २०८१
उत्पतिष्णुस्तूत्पतिताऽलंकरिष्णुस्तु मण्डनः २०८२
भूष्णुर्भविष्णुर्भविता वर्तिष्णुर्वर्तनः समौ २०८३
निराकरिष्णुः क्षिप्नुः स्यात् सान्द्रस्निग्धस्तु मेदुरः १०८४
ज्ञाता तु विदुरो विन्दुर्विकासी तु विकस्वरः २०८५
विसृत्वरो विसृमरः प्रसारी च विसारिणि २०८६
सहिष्णुः सहनः क्षन्ता तितिक्षुः क्षमिता क्षमी २०८७
क्रोधनोऽमर्षणः कोपी चण्डस्त्वत्यन्तकोपनः २०८८
जागरूको जागरिता घूर्णितः प्रचलायितः २०८९
स्वप्नक्शयालुर्निद्रालुर्निद्राणशयितौ समौ २०९०

नाम ॥—वन्दारुः, अभिवादकः, २ श्रद्धापूर्वक ढोगनेका नाम ॥—शरारुः, घातुकः, हिंस्रः, ३ हिंसा गर्नेका नाम ॥—वर्धिष्णुः, वर्धनः, २ बढनेका नाम ॥—उत्पतिष्णुः, उत्पतिता, २ उफ्रनेका नाम ॥—अलंकरिष्णुः, मण्डनः, २ सिगारिनेका नाम ॥—भूष्णुः, भविष्णुः, भविता, ३ सप्रनेका नाम ॥—वर्तिष्णुः, वर्तनः, २ रहने (खप्ने)का नाम ॥—निराकरिष्णुः, क्षिप्नुः, २ सिल्काउने (फ्याक्ने)का नाम ॥ सान्द्रस्निग्धः मेदुरः २ खूब चिल्लाका नाम ॥—ज्ञाता, विदुरः, विन्दुः, ३ जान्नेका नाम ॥—विकासी, विकस्वरः, २ फुलनेका नाम ॥—विसृत्वरः, विसृमरः, प्रसारी, विसारी, ४ फैलिनेका नाम ॥—सहिष्णुः, सहनः, क्षन्ता, तितिक्षुः, क्षमिता, क्षमी, ६ सहनेका नाम ॥—क्रोधनः, अमर्षणः, कोपी, ३ क्रोधी (रिसाउने)का नाम ॥—चण्डः, अत्यन्तकोपनः, २ अतिक्रोधी (अत्यन्त रिसाउने)का नाम ॥—जागरूकः, जागरिता, २ जागै रहनेका नाम ॥—घूर्णितः, प्रचलायितः, २ निद्रामा घुर्नेका नाम ॥—स्वप्नक्, शयालुः, निद्रालुः, ३ अति सुत्नेका नाम ॥—निद्राणः, शयितः, २ निधाउनेका नाम ॥—

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पराङ्मुखः पराचीनः स्यादवाङप्यधोमुखः २०९१
देवानञ्चति देवद्र्यङ् विष्वद्र्यङ् विष्वगञ्चति २०९२
यः सहाञ्चति सध्र्यङ् स स तिर्यङ् यास्तिरोऽञ्चति २०९३
वदो वदावदो वक्ता वागीशो वाक्पतिः समौ २०९४
वाचोयुक्तिपटुर्वाग्मी वावदूकोऽतिवक्तरि २०९५
स्याज्जल्पाकस्तु वाचालो वाचाटो बहुगर्ह्यवाक् २०९६
दुर्मुखे मुखराबद्धमुखौ शक्लः प्रियंवदे २०९७
लोहलः स्यादस्फुटवाग्गर्ह्यवादी तु कद्वदः २०९८
समौ कुवादकुचरौ स्यादसौम्यस्वरोऽस्वरः २०९९
रवणः शब्दनो नान्दीवादी नान्दीकरः समौ २१००

पराङ्मुखः, पराचीनः, २ विमुख (कंढो) फर्काउनेका नाम ।।—अवाङ्, अधोमुखः २ उँधोमुख गर्नेका नाम ।। यो देवानञ्चति स देवद्र्यङ् १ देवताको पूजा गर्नेको नाम ।। यो विष्वगञ्चति स विष्वद्र्यङ् १ चारैतिर लाग्नेको नाम ।। यः सहाञ्चति स सध्र्यङ् १ सँग लाग्नेको नाम ।।—यस्तिरोऽञ्चति स तिर्यङ् १ तेर्सो हिड्नेको नाम ।।—वदः, वदावदः, वक्ता, ३ वक्ता (बोलक्कड)का नाम ।।—वागीशः, वाक्पतिः, २ उचित बोल्नेका नाम ।।—वाचोयुक्तिपटुः, वाग्मी, २ खूब असल बोल्नेका नाम ।।—वावदूकः, अतिवक्ता, २ धेरै बोल्नेका नाम ।।—जल्पाकः, वाचालः, वाचाटः, बहुगर्ह्यवाक्, ४ तथ्य कुरो नजानी धेरै बोल्नेका नाम ।।—दुर्मुखः, मुखरः, अबद्धमुखः, ३ दुर्मुखा (कच्कचे)का नाम ।।—शक्लः, प्रियंवदः, २ प्रिय (मिठो बोल्ने)का नाम ।।—लोहलः, अस्फुटवाक्, २ अक्षर खायेर अस्पष्ट बोल्नेका नाम ।।—गर्ह्यवादी, कद्वदः, २ नजाति (नराम्रो) बोल्नेका नाम ।।—कुवादः, कुचरः, २ आर्काको (बत्खोई) गरेर बोल्नेका नाम ।।—असौम्यस्वरः, अस्वरः, २ रूखो नमीठो स्वर हुनेका नाम ।।—

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

जडोऽज्ञ एडमूकस्तु वक्तुं श्रोतुमशिक्षिते २१०१
तूष्णींशीलस्तु तूष्णीका नग्नोऽवासा दिगम्बरे २१०२
निष्कासितोऽवकृष्टः स्यादपध्वस्तस्तु धिक्कृतः २१०३
आत्तगर्वोऽभिभूतः स्याद्दापितः साधितः समौ २१०४
प्रत्यादिष्टो निरस्तः स्यात् प्रत्याख्यातो निराकृतः २१०५
निकृतः स्याद्विप्रकृतो विप्रलब्धस्तु वञ्चितः २१०६
मनोहतः प्रतिहतः प्रतिबद्धो हतश्च सः २१०७
अधिक्षिप्तः प्रतिक्षिप्तो बद्धे कीलितसंयतौ २१०८
आपन्न आपत्प्राप्तः स्यात् कांदिशीको भयद्रुतः २१०९

